M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. V/26

Title : Upamana Nirupana

InComplete

Title	:	Upamān Nirupan
Author	:	
Editor	:	
Year, Vols.	:	
Publisher	:	8C
Remarks	:	V/26 Presented by Prof. V.R. Trivedi

V/26

त्रतापि वक्तव्यापेक्षया एकस्य कृत्स्नावधिज्ञानवीजगत्वेन गुरुत्वमुक्तं च सार्थ्यमुपमितेर्मानसत्वेन लघवपदवाच्यत्वमुप
मितेर्मिति साक्षात्करोमि न स्यात् नूनं वन्मतेउपमितेर्मानसज्ञानत्वेन तत्रापि साक्षात्कारत्वमस्त्वादिति चेन्मैवं न साक्षात्करोमि इ नि॰
त्याद्यनुव्यवसायाभावेन न विषयीक्रियते किंतु लौकिकविषयताभावे च विषयीक्रियते अनएव सुरभि चंदनमिति चा
क्षुषानंतरं चंदनं साक्षात्करोमि न सौरभमिति प्रत्ययोपपत्तेः तत्रापि सौरभे लौकिकविषयताभावस्यैवावगाहनात् तस्मात्
उपमितिर्मानसज्ञानरूपेति तत्करणं प्रमाणांतरमिति व्याहतं च तत्रापि विशेषमाणमाति स्वतंत्रउक्तमित्याहुस्तत्तुच्छं लाघवात् मान
सत्वजातेरेव सादृश्यज्ञानप्रतिबध्यतावच्छेदकत्वात् न तूपमितित्वमानसत्वाद्युपाधेर्गुरुधर्मस्य एवं मानसत्वस्य प्रति
बंध्यतावच्छेदकत्वे लाघवात् सिद्धे तु नरकालं उपमितित्वं करणकार्यकारणभावादिकल्पने फलमुखगौरवं तथा न दो
षमावहतीति न च तथापि यत्र इच्छाघटादिमानसविषयीकृत तदा गोसादृश्यज्ञाने विद्यमाने पि घटादिमानसदर्शना
त् न तत्र मानसेच्छाभावविशिष्टगोसादृश्यादिज्ञानत्वेन तत्र मानसत्वेनैव विशिष्यैव प्रतिबध्यप्रतिबंधकभावे वश्यक
त्वेन लाघवमिति वाच्यं तथापि मानसत्वाविरुद्धोपमितित्वादिना उपमित्यन्यमात्रं संजायतां इतीच्छायाश्चापि सादृश्यज्ञा

नोत्तेजकत्वं वाच्यं तदेव न वाच्यमिति लाघवस्यैव जागरूकत्वात् गवयपदवाच्यत्वोपमितिरेव मानसत्वेनादृशो
यामम ॥ अनुत्तेजकत्वात् किंतु मानसं जायतां उपमित्यन्यज्ञानं जायतामितीच्छादेरेव च उत्तेजकत्वात् उपमितित्वस्य मान
सत्वव्याप्यत्वे यत्र गवयपदवाच्यत्वस्य उपमितिर्जायतामितीच्छापदवाच्यत्वस्य मानसं जायतामित्यपीच्छा एवं उपमिति
र्जायतां उपमितिभिन्नमानसं च जायतामिति वा इच्छा तत्रानयत्रैव उपमितिरेव जायते ॥ न तु मानसमिति न सर्वसिद्धं अन्यथा
उपमितेर्मानसत्वे उत्तेच्छावशात् उपमितिवत् तदन्यमानसस्यापि आपत्तेः ॥ न हि व्याप्यधर्मावच्छिन्ने जायमाने व्यापकधर्माव
च्छिन्नं न जायतां इत्युपमितितदन्यमानससमूहालंबनमेव स्यात् ज्ञातासादृश्यज्ञानादेः प्रतिबध्यमानसत्वमेव न तूपमिति
त्वस्यापि प्रवेशः इति तत्वं उपमानशब्दनिरूपणयोः एकप्रयोजनकत्वव्याप्यां संगतिं प्रदर्शयन् शिष्यावधानाय प्रतिजानी
ते अथेत्यादिर्न्यैइहाथपदेन उपमाननिरूपणानंतरं शब्दनिरूपणानंतर्याबाधित्वेन सिद्धतया उपस्थितेः उप
माननिरूपणे शब्दनिरूपणेत इत्यनेन वर्त्तमानार्थकलट्प्रत्ययार्थतत्वेन साध्यतया उपस्थितस्य च शब्दनिरूपणस्य तयोर २
वासिद्धसाध्यसमभिव्याहारादेव अनुमानलक्षणस्य हेतुहेतुमद्भावस्य संगतित्वं सूच्यते अत्रानुमाने व्याप्तिश्च साध्यत
नु

ना २
रूपणायत्निष्ठस्याधिकरणवृत्तिलक्षणध्वंसप्रतियोगित्वरूपसिद्धताबोधकवाक्यप्रतिपादितं न वनिबाधकं विना तत्र
स्य न तत्वं न वतीति सामान्यमुखीतिमतव्यापि पिनेदं असंगताभिधानेनार्थान्तरदोषपरिहारके निरूपणीययोः संगति
ज्ञाने पि शब्दोपमानयोः संगत्यलाभात् तथापि निरूपणयोः संगतिनिरूपणे पौर्वापर्यनियामके ति तदभिधानानंतरे श
ब्दाभिधानमर्थवशात्सिद्धं वस्तुतो संगतिर्नैकप्रयोजनकत्वव्याप्येति भिन्नमीमांसर्ये कोपि व्याकोप्रसंगादिसंगतिदर्शनात्
न वा संगतिरनेन तथा तदभिधानव्यापारस्य अत्र प्रमाणनिरूपणानंतरमेव प्रमितिनिरूपणादिति सर्ववादिसिद्धापि निरूपणयो
रूपजीव्योपजीवकभावसंगतिर्नामिदि ता अनेनतदभिधाने नूद्देशक्रम एव नियामक इत्यर्थः शब्दोत्र मांगलिक वेदेति तत्वप
त्तु अथ शब्दस्य उपमाननिरूपणजिज्ञासानिवृत्तिलक्षणोद्दिष्टलक्षणलक्षितार्थः निरूपणरूपधर्मत्वविशिष्टस्य चयः अन्यस्य विषय
वेतथाचोपमानान्तरप्रत्ययार्थविशेषणत्वं तथा चोपमाननिरूपणजिज्ञासानिवृत्तिलक्षणनिष्ठानिन्त्रनिरूपणविषयः शब्दः
यः एवं च वसरसंगत्या उपमाननिरूपणनिरूपणं इत्यत्र निरूपणे लक्षणस्वरूपप्रमाणप्रतीत्य अन्तोव्यापार इत्यर्थः ॥ स च श
ब्दरूपः तद्विषयता च व्यापारानुबंधिनी निष्पेयं अन्ये अथ शब्दस्य तु प्रसन्नमीकस्य अनेन तरस्मरणं एवशक्तिः उपमाननिरूपण

वधित्वे लक्षणे युगपत् वृत्तिद्वयविरोधश्च तात्पर्याभावेन्नैवेत्येवमगमायां घोषमस्य घोषस्य इत्यत्रान्वयधीरिति मणिकृतः नन्वत्र
सत्र प्रयोनिष्ठत्वार्थस्य ध्वन्त्वर्थनिरूपणे वाच्यः॥ तर्हि उपमानं निरूपणावधिकानंतरक्षणनिष्ठनिरूपणविषयः शब्द
त्यन्वय इत्यलमनेनेति विविच्यितं चैतदधिकतया प्रागेवास्तु मात्रपरिच्छेदादौ अत्र शाब्दे निरूप्यत इति प्रतिज्ञातस्ते शब्दपदं
प्रमाणपरं अतो तत्र प्रमाणाधीनमिति प्रमाणं निरूप्यत इत्यादिना प्राक् प्रमाणनिरूपणस्यैव प्रतिज्ञातत्वात् तेन समं नावि
रोधः तत्र लक्षणस्वरूपादिभिः प्रमाणशब्दनिरूपणीये शाब्दः प्रमाणशब्द इत्यर्थः॥ इदं च लक्षणनिर्देशकं नन्वलक्षणं निविष्टं चैतत्प्रत्य
त ननु शाब्दत्वं प्रत्यक्षाद्यन्यत्वं वाच्यं एवं च प्रत्यक्षभिन्नं सत् यत् उपमितिभिन्नं तत्त्वं नन्द्विं स्वोपमितिभिन्नं सत् यत् प्रत्यक्षादिभि
न्नत्वं चेति विनिगमकाभावात् नाद्येव तदाद्यं तथा च लक्षणे ननुगमः व्यासज्यवृत्तिनी च एकत्र द्वयमिति न्यायेन च ना
वच्छेदकतैव नात्र प्रसिद्धांतादत आह॥ शाब्दत्वं चेति ननु तदभावव्याप्य चत्राज्ञानं प्रतिबध्यतावच्छेदकतया सिद्धं प्रत्य ३
क्षभिन्नज्ञाननिष्ठं परोक्षत्वं जातिमादाय सांकर्यात् तथाहि परोक्षत्वं रूपशाब्दजन्यचेद्वत्वाभावव्याप्यवत्प्रत्यक्षमिति ज्ञान
कालीनं सुखं चेत्यादि शाब्दव्यावृत्तं शाब्दव्यावृत्तत्वं च अनुमित्यादिपरोक्षव्यावृत्तं घटादिशाब्दे चोन यं संकीर्णमिति न शा

ब्दत्वं जातिरत आह॥ जन्यपदधीजन्येति यद्यपि शाब्दान्वयव्यमिति प्रतीत्या न जातिर्विषयीक्रियते किंतु शाब्दजन्यज्ञानत्वोपाधि
रेवेत्यत आह जन्येति जन्यपदधीजन्यत्वव्यभिचारिणी अनुभवत्वाद्व्याप्यिका च जातिः प्रत्यक्षत्वानुमितित्वं तन्न्यूनत्वे सति पद
विषयत्वाव्यभिचारिणी जातिरूपमितित्वं तन्न्यूनत्वं शाब्दे इत्येव योजं स्मृतीनामिति॥ अत्र स्मृतित्वमिति अनुभवसामग्रीप्रती
बध्यतावच्छेदिका जातिरिति बोध्यं॥ तादृशीनां जन्यपदज्ञानव्यभिचारिणां इत्यर्थः॥ जातिशून्यत्वं जातिशून्यत्वमात्रं अनुभा
नवकत्वाव्यापकजातिशून्यत्वं च तन्मात्रं चेत्यर्थः॥ असंभवं विवृणोति॥ अनुभवत्वेति॥ जातिशून्यत्वमपीति जातिशून्यत्वमात्र
मपीत्यर्थः॥ तथा असंभावीत्यर्थः॥ तादृगिति इति तथा च अनुभववारणार्थो अनुभवत्वाव्यापकत्वे जातिविशेषणं॥ नैवं तदसंभव
वारणार्थो अनुभवत्वान्यत्वमेव जातिविशेषणं लाघवादस्त्विति वाच्यं॥ तथापि ज्ञानत्वगुणत्वादिमादाय दोषतादवस्थ्यात् अ २५
नोनुभवत्वाव्यापकत्वमुपात्तमिति ध्येयं॥ नन्वजन्यत्वे पदधीविशेषणं अतः अतो वा अनुभवत्वव्याप्यत्वं लघुत्वव्यभिचारिणां जाति
रुपमितेः जातिविशेषणं विहाय अनुभवत्वाव्यापकत्वं विशेषणं तथा च पदधीजन्यत्वव्यभिचारी अनुभवत्वाव्यापकजातिशून्यत्वमेव लक्षणमस्त्वित्या
शंक्यतो पदधीजन्यत्वेति अनुमितावपीति॥ ननु अनुमितौ वा दृशजाति रनुमितित्वे तन्न्यूनत्वाभावान्न्याति व्याप्तिरत आह॥ अनुमितित्वस्येति॥
तत्वात् तत्व अनुमितित्वस्य अनुभवत्वाव्यापकजातेः तथा च तादृशशून्यत्वं चास्तीत्यतिव्याप्तिरिति भावः॥ यद्यपि ईश्वरीयपदधीजन्यत्वव्यभिचारी

अनुभवत्वापरजातिरप्रसिद्धेः सर्वप्रमितेरेवेश्वरज्ञानजन्यत्वात् इति कथं तद्वृत्त्यन्यत्वमनुमितावसिद्धमित्यत आह तथापि अनुमितावपीत्यादिना अतिव्या
प्तिर्निराकृता किंतादृशजातेरप्रसिद्ध्या असंभव एवाभिहितः अत एव अनुमितावपीत्यपिकारः स्वाप्नादिसंग्राहकः संभवति तं जन्यत्वमि
वारः अनुभवत्वाव्यापकजातिशून्यांतमित्यर्थः शून्यांतमितिपदविषयत्वाव्यभिचारी आदौ तिष्ठेत् जात्यादावित्यादिपदात् विशेषस
मवायाभावादिपरिग्रहः नन्वनुभवत्वापरजातिशून्यत्वमेव संभवति इति वाच्यं सत्तावति व्याप्तेः ननु अनुभवत्वव्याप्यजातिम
त्वमेव तिविशेषणीयमिति चेन्न प्रत्यक्षादावतिव्याप्तेः सोपमितिशाब्दप्रमितिकरणं नतत्राव्याप्तिरित्यर्थः दूरपक्षवः अपक्षोक्तमश
क्यः तज्जनकत्वमपि शाब्दोपमितिजनकत्वमपीत्यर्थः तथा अपक्षोक्तसमशक्यः अपक्षव विशेष्यः नन्वेवमाह आगोपांग
नमितित्वस्य तथा शब्दत्वेन विजातिपर्वतेद्वनिशाब्दोनुमितिर्व्याप्यसमानाधिकरणप्रमितिजनकोपाध्यवच्छिन्नजनकोपाधि त्रिवि
विप्रतिपत्तिः अत्र विधिकोटिर्नैयायिकस्य निषेधकोटिर्वैशेषिकस्य विधिकोटिप्रसिद्धिप्रत्यक्षप्रमाणे निषेधकोटिप्रसिद्धिश्च
वृत्त्यादावेवमनुसंधाः अत्र प्रमाणाविनाशकोपाध्यवच्छिन्नजनकतानवच्छिन्नप्रमितिविनाशकोपाध्यवच्छिन्नजन्यतानिरूपितावच्छेदकतानेन ४
स्यमन्याङ्गुप्रविशब्दस्य कारणत्वेनेष्टापत्तिस्तत्र लौकिकसाक्षात्कारत्वावच्छिन्नजन्यतायाः शब्दनिष्ठजनकतानिरूपकत्वात् ननु प्रमितिवि
नाशकसाक्षात्कारत्वावच्छिन्नजन्यतापादनिनवानत्र शब्दस्य शब्दत्वेन जनकत्वेनापि नियतत्वेनेति चेत्तदा यद्यपदं पदज्ञानं वानुमितिनि

शाब्दविषयकानुमयकारणं नवेति विप्रतिपत्तिरिह बोध्येत्यलमधेन न अनुमानविधया अनुमानत्वेनैवेत्यर्थः अनुमानं चगामानयेत्यादिपदानि
तात्पर्यविषयसंसर्गवत्पूर्वकाणि आकांक्षादिमत्पदकदंबकत्वात् पृथगेव शाब्दत्वेनैव मानं प्रमितिजनकमित्यर्थः नन्वनुमानं अनुमितिकरणं शब्द
स्यैतिः पक्षाव्याप्यत्वात् तज्जन्य प्रतिपत्तिविषयार्थव्याप्यत्वाऽव्याप्यं दर्शयति तान्दनितदत्तिवात् आकाशादर्शित्वात् नचाकांक्षादिमत्पदत्वेन
पदपक्षकतात्पर्यविषयसंसर्गज्ञानपूर्वकत्वेऽनुमीयमानेनव्याप्तज्ञाव इत्यत आव्याप्तिधीजन्यत्वात् व्याप्तिनिश्चयजन्यत्वादित्यर्थः प्रतीयं
नीतिलौकिकाः लौकेनवाः लौकिकाः लौकिका एव लौकिका इति यावत् दृश्यते चेत्तियद्व्याप्तिभ्रमादेवानुमितिरत आह तेचेति अयं शाब्दा
दनुभव इत्यर्थः शब्दस्य शाब्दानन्यप्रतीत अननुमिनमितिमिति इदमुपलक्षणं नोपमित्यपि बोध्यम् एवं च शाब्दजन्यज्ञाने अनुमितित्वप्रत्यक्षत्वाद्यभावे
गृहीतिजायमाने ज्ञाने शाब्दजन्य अनुमितित्वाभावाद्ययमितिसिद्धं शाब्दत्वं अनुमितित्वविरुद्धमितिभावः श्रुतमितिश्रुतिविषयशाब्दजन्यशाब्दविषय
इत्यर्थः इदं रजतकर्मकानयनादिनैयायिकेन्य इतितथापि नैयायिकेन शाब्दे छद्मैवाख्यरिते इति तत्पाद तात्पर्यज्ञाना ग्रहावात् नच ज्ञानशब्दा
भवश्रोतुर्निविष्यतु नन्वनुमितिरितिनैयायिकेन्य इत्युक्तेवैशेषिकस्य शाब्देऽङ्गीकारयिकत्वेऽनुलिंगनयेवक्षापकत्वेतस्य तात्पर्यान् श्रोतृवनश
ब्देन वह्नितिभावः वस्तुनो बुधानोरेव शाब्दानावच्छेदकं शाब्दत्वं श्रुतोनानार्थत्वात् अतएव श्रुतोत्यान्य इति प्रयोगोपात्तविशेष्यकोत्प
यत्ने अनुमितित्वे शाब्दत्वस्यावगाह्यत्वे पादानुपपत्तेः श्रुतिरपि अनुमितित्वविरुद्धत्वेशाब्दत्वस्य मानमितितत्वं अपि च शाब्दत्वस्य अनुमिति

त्वे वह्निव्याप्याभाववान् एवं नो वह्निमानिति शाब्दबुद्धिर्न स्यात् तत्र वह्निव्याप्यवत्ताधियो हेतुत्वात् न साध्यवह्निव्याप्याभाववत्ताधीविरोधित्वा
दितिदिक् । अनुमितिविस्तरेणेति अत्र केचित् । अनुमितित्वव्याप्यमेव शाब्दत्वं न तु तद्विरुद्धं लाघवात् न चैवं यं प्रमानयेत्यादिवाक्यमा
त्रेणाजातबोधे घटं शाब्दयामि नानुमिनोमीत्यनुभवदर्शनात् कथमनुमितित्वव्याप्यं शाब्दत्वमिति वाच्यं । तन्मते रक्षतायां लिंगाभेदेन विशि
ष्टहेतुत्वात् वरमत्रासिद्ध्याभावउपपवता कार्यतावच्छेदकत्वेनांगीकृतविलक्षणविषयताभाव एव नानुमिनोमीति प्रतीत्या विषयीक्रिय
ते पक्षतायाश्चाहेतुत्वात् न त्वनुमितित्वाभावइति । यत्तु व्याप्तिज्ञानविधुराणामपि वह्न्याविर्णयो बोधः स्यात् नानुमितिरूपः शाब्द इति
तन्न नह्यनुमितित्वावच्छिन्नं प्रति व्याप्तिज्ञानत्वेन कारणता अपि तु ज्ञानत्वेनेति विनावनीयमित्याहुः । तन्मंदं मद्शाब्दविर्णो जायमानप्रति
तौ नानुमिनोमि इति प्रत्यनुविनवेऽपि चेदनुमितित्वं अनुभवस्य विलक्षणविषयतानानीवादत्यार्थकतयेप्यतेव दातत्रैव प्रतीतौ न साक्षात्करो
मीत्यनुभवस्यापि लौकिकविषयत्वाप्रतिघतिवद्धाभावच्छेदकत्वेनांगीकृतविलक्षणविषयत्वादेर्वाभाव एव विषयोस्तु ननु प्रत्यक्षत्वाभाव
इत्यपि स्यात् तथावतादृशज्ञानस्यथानिगमकाभावेन मानसप्रत्यक्षत्वं वाच्यं एवं च मानसत्वामयाः सर्वेषु सनवप्रत्यक्षमितिरेव शाब्दमितिरि ५
त्यस्यापि सुवचनत्वात् तोचार्वाकमतानुयायिजन्येन किंचानुमितित्वस्य प्रत्यक्षत्वव्याप्यसंभवत्वे अनुमितावपि दत्तजलांजलिः स्यात् अपि च वाक्यार्थानु
भवशाब्दकालीनबोधमादाय व्याप्तिज्ञानाद्यन्यतमवादिनाऽनुमितिजनकत्वमित्यत्र विनिगमकाभावः एवंपदा । दिज्ञानानां व्याप्तिज्ञानमंतर्भावेन

रूपेण शाब्दजनकत्वं न तु पदाविज्ञानमंतर्भाव्येत्यत्रापि विनिगमकाभावात् सिद्धं प्रमाणान्तरत्वमित्यनेनेदितिकृ । जरन्मीमांसकास्तु वाक्यार्थगो
चरयथार्थज्ञानवक्तृत्वरूपाप्तोक्तवाक्यज्ञानस्य लौकिकवाक्यजन्यशाब्दबुद्धौ कारणत्वमंगीकुर्वंतो अनुमानादिना आप्तत्वज्ञानानंतरमेव शा
ब्दबोधस्तु गृहीतशाब्दबोधजनकत्वेन लौकिकवाक्यं न प्रमाणमिति वदंति तदपि मंदं वेदान्तु कारणपक्षमाणेन मत्वादिवाकेप्सुविनाप्तोक्तत्व
बोधं गौउमिमांसकानामर्थप्रत्ययात् न च लौकिकत्वेन ज्ञानेन द्वीजमिनिवाच्यो नाकालीनतस्य रूपाय लौकिकत्वज्ञानस्यैव हेतुत्वेन मन्व
तथानंनहेतुहेतुमद्भावापत्तेः । वेदकर्तुमसामर्थ्यादेवकार्येणत्वज्ञानस्याप्ताक्तत्वज्ञानस्यान्यथासिद्धत्वाच्च । इत्यलमपल्लवितेन । स्वातंत्र्येणेति शाब्द
त्वेनेत्यर्थः । पामराणां अव्युत्पन्नानां शक्तिग्रहस्येति तथाच तेषां घटादिपदे शक्तिग्रहाभावात् किंतु गगरीपदादेव शक्तिग्रह इति भावः घ
पदिपदे रेवशाकेरिति घटादिपदशक्तेरित्यर्थः । शक्तिज्ञानस्य शाब्दं तु कारणत्वसिद्धौ शक्तिं निरूपयितुं अधोनिरूपितिघेति पदार्थांतरेन तन्म
तपदार्थवावच्छेदकाभाववदित्यर्थः । तेन न सिध्यासिद्धव्याघातइत्यर्थः । शंकेन ग्राह्यं ईश्वरेच्छादिन्तपशंकेतज्ञानगतमित्यर्थः । मीमांसकाः
न्नहा । तथाच तेषामयमाशयः अर्थवाद वाक्यं लौकिकवाक्यं प्रमाणमेवप्रमाणं च विधिवाक्यं तत्र च लिंगादिनिधनानामपदार्थांतरं अपालिं
गसमवेता शक्तिज्ञानगम्या सानिं धर्माद्विविधा एका सर्वाख्यातशान्यापरा वा आयत्नरूपा अन्या च शब्दजन्या शाब्दसमवेता पदार्थां । तद्रूपालिं
गशक्याभावनाप्रवर्त्तनापरनाम्नी एवं च प्रवर्त्तनात्वं ज्ञानानुकूला एका शक्तिः भावना त्वं ज्ञानानुकूला चापरा एवं प्रवृत्त्यनुकूला एका

शब्दात्यनुकूलेनिष्प्रथितिदोषेत्यनुकूलाचेतिशक्तिपंचकमितिध्येयंकरणस्यपरनिष्ठव्यापारजनकत्वंस्वनिष्ठव्या
पारजननद्वारेतिनियमात्एवंचगुरुमतस्यस्वर्गादिफलव्यापारीभूतप्रवृत्तौलिंगादिशब्देनजनीयेस्वनिष्ठाभिधानजनपि
त्वेनेतिनियमउपपद्यतेयुक्तंचैतदनुरूपप्रवृत्तिहेतुःस्वेच्छयानप्रेरणयाचआचार्यप्रेरितोहंगामानयामिनतुस्वेच्छयेतिव्यव
हारात्तथाचशाब्दप्रवृत्तावाचार्यादेःप्रवर्त्तकत्वेनाचार्यादिःसाक्षान्नप्रवर्त्तयतिकिंतुस्वप्रवर्त्तनाज्ञापनेच्छानुसाधेत्यनुभ
वसिद्धंप्रवर्त्तनाचप्रवृत्तिप्रयोजनःप्रवृत्तीपितुव्यापारःसचचेतनस्यइच्छारूपःअहमेनंप्रवर्त्तयामीत्यनुभवसिद्धःअचेतनस्य
ह्यादेःयथापदार्थान्तरंप्रवर्त्तनाशब्दभावनादिपदवाच्यं।शब्दस्यतत्रयेद्व्यत्वेनसमवायिकारणत्वाविरोधात्साचकिंकेनक
थमित्यंशत्रयवतीतस्यास्तुकर्मयागादिकरणांशाशक्तिज्ञानंइतिकर्त्तव्यताचवायुर्वैक्षेपिष्ठादेवतातरतिमृत्युंतरतिब्रह्महत्यां
योश्वमेधेनयजेतेत्यादिस्तुत्यर्थवादादित्रयंअंशत्रयंतथाचफलजननेकमधुक्तत्रयसापेक्षत्वमेवांशत्रयमंशवत्त्वंनतुत्रिविधं
त्वंसावयवत्वंचेतिएवंचविधिश्रावितालिंगत्वादिपदात्संकेतेनशाब्दीभावनोपस्थितौगुरुमतेकार्यविशेष्यकबोधइवनद्व ६
नयेपिअभिधाविशेष्यकोन्वयबोधः।तथाचयागविषयकप्रवृत्तिजनकाभिधास्वर्गजननेष्णामिबोधः।स्वर्गसाधनत्यादिकेअरा
धमपियोग्यतावशात्।अन्वयितावच्छेदकतयानाप्यते।स्वर्गकामादिपदं।तदुक्तंअभिधाभावनामाहुरन्यामेवलिंगादयः।अ

र्थात्मभावनात्वन्यासर्वाख्यातस्यगोचरा।अर्थात्मभावनाअर्थयागादिगोचरास्तताः।अन्याशाब्दीभावनातोभिन्नेत्यर्थः।साचशाब्दीभावना
अंशत्रयवतीति।कथंतुतत्रैवलिंगाभिधासैवचशाब्दीभावनानाव्याचतस्याःप्रवृत्तिःसंबंधबोधःकरणंतदीयंप्रबोधनांगतयेव
उपपते।व्याख्यानंतन्वमेतत्इत्यलमनेनेति।नव्यमतेस्वरसंप्रकाशयन्नाह।नैयायिकास्त्विति।मानाभावात्।संकेतभिन्नायामभिधाया
मानाभावात्।इत्यर्थः।तथाचोक्तमदीयतदीयेव्याप्तेरनुमितिकरणेव्याप्तिज्ञानेव्यभिचारात्बहिर्व्याप्तिज्ञानेनपरनिष्ठानुमितेजनना
त्स्वनिष्ठव्यापारांतरंजनयतीत्यप्रयोजकत्वात्इतिभावः।किंचयदिविधिर्मांप्रवर्त्तयतीतिप्रतीतिबलात्प्रवर्त्तनासिद्धिःसहा
धूमोमांप्रवर्त्तयतीतिनतोधूमादिलिंगेपिप्रवर्त्तनापत्तिः।ननुनव्यमतेसंकेतएवकिमत्राहसचेति।इदंत्वेवैमिति।एवंतत्को
कारकेच्छायाएवशक्तित्वेपामरसंकेतितागगरी।फपडेत्यादिशब्दादित्यर्थः।अभिधायिकाःपामराभिप्रेतप्रतिपादकाः
सुरपामराणामपीतिशेषः।संकेतमात्रंइच्छामात्रंसंकेतःतादृशेच्छेत्यर्थः।सोस्तीश्वरेच्छारूपसंकेतोस्तीमानाभावात्।विद्व
त्स्व।अरूपफलाभावेननापभ्रंशेईश्वरेच्छासंकेतइतिभावः।पामराणांईश्वरसंकेतामविदुषांअर्थप्रत्ययइति।तेषांईश्व
रेच्छारूपसंकेतज्ञानाभावादित्यर्थः।तेषामपिपामरादीनांईश्वरानंगीकर्त्तृमीमांसकानांचेत्यर्थः।तथाज्ञानंशक्तित्वेनज्ञानं
कागतिरिति।तत्रेश्वरेच्छारूपसंकेतज्ञानाभावादित्यर्थः।सामान्यतस्तस्यापीति।आधुनिकपित्रादिसंकेतितेपिवादृशादका

तीनपिनद्युरितंनामत्वादिनामवाच्यशिशुरित्याकारकेश्वरेच्छयैवईश्वरेणताहृशयथुतिव्रणयनादित्यर्थः॥नच्चापीश्वरसंके
तोस्तीतिवाच्यःअत्रवदंति।अस्मात्शब्दात्अयमर्थोबोद्धव्यः।इत्याकारिकाईश्वरेच्छैवसंकेतरूपानतुतच्चज्ञानरूपात्
इतिरूपाचेतित्येकविनिगमकाभावात्ताद्दशंज्ञानंतत्रतिज्ञानंवरपिशक्तिज्ञानतयाशाब्दबुद्धिंप्रतिहेतुत्वप्रसंगात्॥नच
ईश्वरज्ञानस्यसकलविषयकत्वंस्वीक्रियतेनतुसकलप्रकारितापितथाचेश्वरज्ञानस्यताद्दशेच्छत्वेवाताद्दशप्रकारितायां
मानाभावात्नप्रत्येकविनिगमनाविरहइतिवाच्यं।इच्छायांताद्दशप्रकारितास्वीकारेअवश्यंकृतिज्ञानयोरपिताद्दशीप्र
कारितावाच्या।इच्छाकृत्योःपरयाचितमंडनन्यायेनविषयत्ववत्ज्ञानविषयत्वेवताद्दशविषयत्वअतएवबाधेचरणो।हि
तिःसकद्धैकेत्वनुमानेईश्वरकृतिसिद्धौकृतिविषयतानुरोधेनताद्दशेच्छासिद्धि॥ताद्दशेच्छाविषयतानुरोधेनताद्दशज्ञा
नतस्सिद्धिरित्युक्तमेवं।परयाचितमंडनन्यायेनकृतिविषयतास्वीकारस्तुअनित्यज्ञानेच्छाकृतिस्थलेएवतत्रहिस्वजन
केच्छाविषयताप्रयुक्तमेवकृतिविषयतावत्वं।ताद्दशेच्छाविषयतावत्वंतुताद्दशेच्छाजनकज्ञानविषयताप्रयुक्तमेव ७
नित्यस्थलेतुधर्मिग्राहकमानेनैवतत्सिद्धिरितियुज्यते।चेतत्।अन्यथाकृतेःसामान्यतएवइच्छाविषयताप्रयुक्त
विषयतायत्वेननिखिलतत्तेरेवनिखिलविषयवत्वप्रसंगइत्यतस्ताद्दशातिप्रसंगवारणायावश्यंस्वजनकताप्रवेशइति

अथैवंनित्येच्छायांताद्दशप्रकारितायामेवकिंमानंयदिचप्रश्नतानुरोधेनचेदायाति।तदाज्ञानस्यवपितत्सिद्धिः।प्रसंगःएवंचई
श्वरकृतिज्ञानंज्ञानज्ञानंवाशाब्दधीहेतुरस्त्विति।रेचेन्नावैदिकशाब्दबोधेवस्तुतात्पर्यज्ञानवत्वस्यसकलजनसिद्धत्वादवश्यंपदना
त्पर्यंकृपेश्वरेच्छास्वीकरणीयासैवचसंकेतरूपाइत्यल्पंपल्लवितेन।अथैवंगगापदात्तीरबोधोजायतामितिच्छायाअपिविद्यमानत्वा
त्प्रवादइवतीरेपिशक्तिग्रहणंगइतिचेन्न।ईश्वरेच्छायांताद्दशप्रकारितायामानाभावाल्लमनेनेतिदिक्।कथंकेनमानेने
त्यर्थः।तत्रकेषांचित्तुत्तरंखंडयति।उपमानेति।तस्यचेति।वाक्यार्थज्ञानस्यचेत्यर्थः।शक्तिग्रहमूलकेति।तथाचताद्दशज्ञानंत
दपिचेदुपमानांतरात्तदानवस्थानोचेत्शक्तिग्राहकांतराभावात्ग्रहएवनस्यादित्यर्थः।व्यवहारादिति।व्यवहारः।आनयन
नयादिक्रियारूपः।केनचिदुक्तः।प्रयोजकवृद्धेनेत्येकश्चेनेतिप्रयोज्यवृद्धइत्यर्थः।तदर्थंप्रयोजकवृद्धवाक्यार्थंप्रतीत्यघटमानयतीघ
टानयनानुकूलचेष्टावान्भवति।तद्धेति।घटानयनमित्यर्थः।तथाक्रियायाघटानयनानुकूलक्रिययेत्यर्थः।तस्यप्रयोज्यवृद्धस्यप्र
त्यंघटानयनगोचरंप्रयत्नमित्यर्थः।तस्यज्ञानंघटानयनगोचरज्ञानंप्रयोज्यवृद्धस्येतिशेषः।अनुमिनोतीति।बालइतिशेषः।तथानिश्च
यान्बालेनस्वीयस्तनपानादिगोचरप्रयत्नेज्ञानव्याप्यत्वावधारणात्।तद्धेत्वाकांक्षायांज्ञानहेत्वाकांक्षायांशाब्दमेवज्ञायमानशाब्द
मेवकल्पयति।ज्ञानहेतुत्वेनकल्पयतीत्यर्थः।आवापोद्वापाभ्यांअन्वयव्यतिरेकाभ्यांकल्पयति।बालइतिशेषः।तस्मिन्कार्यकार

णाभावेनत्वेवंज्ञायमानघटादिपदात्कर्मत्वपदादीनांयन्नउपस्थितिःस्यादितिग्रंतआह।अतिप्रसंगेति।तथाचनतत्शक्तेर्ज्ञा
यमानपदत्वेनकारणतातत्तद्वोद्धृत्वेनकार्यतेतिनकोपिदोषः।इतिभावः।तदनंतरं-आद्यशक्तिग्रहानंतरं।शाब्दात्व्याप्यशाब्दा
त्वद्वयोःप्रयोज्यप्रयोजकवृद्धयोरित्यर्थः।अन्ययोःतत्पूर्वकालीनप्रयोज्यवृद्धप्रयोजकवृद्धयोरित्यर्थः।अनादित्वादिति।तथाचश्रु
त्यघनवस्थानदोषायेतिभावः।सर्गादौसृष्ट्याद्यकालेतदसंभवात्प्रयोज्यवृद्धप्रयोजकवृद्धयोरसंभवात्।प्रलये।खंडप्रल
येआगमेति।उपलक्षणंचैतत्।अनुमानमपिप्रमाणंद्रष्टव्यंतथाहि।कालकलापान्यावृत्तिघटप्रागभावःकार्यद्रव्यानधिकरण
कार्याधिकरणवृत्तिः-अपाभावत्वात्गगनवृत्तिघटात्यंताभाववत्।पक्षधर्मताबलाच्चघटप्रागभावेखंडप्रलयवृत्तित्वंसि
द्धं।खंडप्रलयसिद्धिरितिदिक्।सर्गादौप्रयोज्यप्रयोजकवृद्धयोरसंभवादित्याशंकितस्यसमाधानमाह।उच्यतइति।सर्गादौ
ईश्वरःशरीरद्वयंपरिगृह्यप्रयोज्यप्रयोजकतागच्छत्बालस्यशक्तिंआदौग्राहयतीतिवाक्यार्थः।अन्यथानुपपत्तिरेवेतिपप
त्ति-अन्यथानुपपत्तिर्नैमानंतथाप्यन्यथानुपपत्तिप्रसूतव्यतिरेक्यनुमानमित्यर्थः।अनुमानंच-आद्यशक्तिग्रहः।प्रयोज्यप्रयो ८
जकवृद्धव्यवहाराधीनः।आद्यशक्तिग्रहत्वात्घटवदितिव्यतिरेकीद्रष्टव्यं।तेषांमन्वादीनांमानाभावादितिकपिलम
न्वादीनांचनित्यसर्वज्ञत्वेतथुईश्वरत्वेननैवविप्रतिपत्तिः।किंतुनाममात्रेणतुथतुभवान्कानोहानिकपिलत्वमन्वादयस्तु

वस्तुतोनैवंभूताइतिभावः।मानं।सर्वज्ञत्वेमानमित्यर्थः।एवमपितेषुसार्वज्ञेपि।तथाचपूर्वसंगेकपिलमन्वादे
रेतेषांअभावाचकथंव्यवहारप्रवृत्तिरितिभावः।तत्राप्येकइति।कपिलमन्वादिसर्वज्ञोन्यःकल्प्यतामित्यर्थः।एकएवेति।
कपिलमन्वादिरित्यर्थः।तथाचकपिलादिरेकःसचसर्गदर्शीनित्यःसर्वज्ञःस्यादितिनिगर्वःसर्वैःचेतिसर्गाद्यावित्ति
शेषः।मूलंव्यवहारप्रवृत्तौकारणमित्यर्थः।सएवेतितथाचनाम्नीविप्रतिपत्तिर्नतुनामिनीतिध्येयं।इदमुपलक्षणं
आगमोक्तिः।सकर्तृकाकार्यत्वात्इत्याद्यनुमानंबोध्यं।तदुक्तमाचार्यैः।श्रुतोहिभगवान्बहुशः।श्रुतिस्मृतीहास
पुराणादौ।इदानीमेनव्योनवतीत्यलमनेनेति।परमतंदूषयितुंशंकते।स्यादेतदिति।शक्तिग्रहोघटपदशक्तिग्रह
इत्यर्थः।काश्यामिति।गोविशेषणं।देशांतरीयस्यदेशांतरविद्यमानस्यकदापिकाश्यामनागतस्यपुरुषस्येत्यर्थः।तस्य
देशांतरीयपुरुषस्यतथाचागृहीतसक्तिकव्यक्तिनाबंयोग्यतावशादपिशाब्दनस्यादित्यचतात्पर्यंइतिभावः।अत्रशा
ब्दप्रतिशक्तिज्ञानकारणत्वेगोत्वइति।नागृहीताविशेषणंन्यायादिदमुक्तं।विशेष्यंनाभिधागच्छेत्क्षीणशक्तिर्विशेष
णइति।उपलक्षणंचैतत्।सामान्यालक्षणानास्ति।अतःशाब्दविषयीभूतायागविशक्तिग्रहोपितुशक्यःएवंतावती
पुव्यक्तिकल्पनागौरवाद्वेतिध्येयं।तथाचगोत्वविषयकशक्तिज्ञानत्वेनकारणतागोत्वविशिष्टबोधत्वेनकार्यता

तिभावः॥तर्ह्यीति॥व्यक्तेरशक्यत्वइत्यर्थः॥व्यक्तिलाभःशाब्दे व्यक्तिविषयता॥अशक्यार्थस्य शाब्देऽभानादिति भावः॥
आक्षेपात् जातिशक्तिबलात् इत्यर्थः॥अत एव जातिशक्तिर्न हातं पदं जातिविशिष्टस्मारकमनुभावचेति मणि
कृतः॥अग्रमते आक्षेपशंकते॥नचेति॥निराकरोति तत्स्येति॥तस्य गवादिधर्मिणः॥अर्थापत्तिमेवाह॥गोत्वं हीति॥आक्षिप
तीति॥तथा च शाब्दत्वे अर्थापत्तित्वव्याप्योपाधिरूपं मंतव्यं गुणगता जातिरेव नास्तीति भावः॥प्रतीयते शाब्दबोधे
विषयीक्रियत इत्यर्थः॥गुरुमते आक्षेपपदार्थमाह॥तस्मादिति समानवित्तीति जातिरेव नास्तीति तथा मिति भावः॥शाब्दसा
मग्रीकवित्तिवेद्यमित्यर्थः॥इदमेव विषयति॥यावती हीति॥जातिधीः जातेः शाब्दधीरित्यर्थः॥तावता शाब्दधीरितिशेषः॥
एवं च जातिविना व्यक्तिप्रक्षेपेपि न क्षतिः व्यक्तेर्लाभः व्यक्तिभानं नेयत्यं शाब्दे इत्यर्थः॥तथा च जातिभानसामग्री॥जाति
शक्तिज्ञानमेव व्यक्तिबोधिकेत्यर्थः॥ननु गुरुमते क्लृप्ता शक्तिः सा च जातौ व्यक्तौ च किंतु जातिज्ञानं व्यक्तिबोधयति॥ननु व्य
क्तिशक्तिज्ञानमपि व्यक्तिशाब्दकारणं॥व्यक्तिशक्तेः स्वरूपसदुपयोगीत्वमिति न युक्तं॥विनिगमनाभावात् व्यक्तिशक्तिज्ञा ५
नमेव कारणमस्तु जातिशक्तिस्तु स्वरूपसदुपयुज्यत इत्यस्यापि वक्तुं शक्यत्वात् अत आह द्वेति॥जातिशक्तेरेवेति॥तथा च जा
तावेव शक्तिः॥ननु व्यक्तावपीति न क्लृप्ता शक्तिः स्वीकरणीयेति भावः॥अन्यशक्तेति॥तथा च व्यक्तेरशक्यत्वे जातिशक्तिज्ञाना

न्व्यक्तिभाने अशक्यत्वाविशेषात्॥गोभानमिव पटादिभानमपि गोत्वशक्तिज्ञानस्यादित्यर्थः॥गोत्वशक्तंपदमिति॥तथा च गो
त्वं गोपदवत् गोपदं गोत्ववत् इत्याकारकं वा गोत्वं गोपदान्यतर विशेष्यशक्तिज्ञानं कारणं कारणता च गोत्वविषयकपो गोप
दशक्तिज्ञानत्वेन तयोः यदि च गोत्वविशेष्यकशक्तिज्ञानत्वेन तयोः यदि च गोत्वविशेष्यकशक्तिज्ञानकारणत्वे गोत्वत्वरूपा
धेरवच्छेदकत्वविशिष्टशाब्दत्वेनेति नातिप्रसंग इति भावः॥जात्युपस्थापकपदं व्यक्तिशाब्दे हेतुरिति मतं निर्व्यूढं मन्यमानः प
तितयासनीति॥यथाश्रुते तन्मते नैष दोषः संभवति॥गोत्वविषयकगोपदशक्तिज्ञानत्वेनैव कारणतायाउक्तत्वात् न तु गोत्वो
पस्थापकज्ञानत्वेनापि गोत्वोपस्थापकस्याभावात् इति ध्येयं॥नव्यास्तु परमते शक्यतावच्छेदकगौरवं दोषः॥अस्माकं गोत्व
जातिरेव शक्यतावच्छेदिका तेषां तु गोत्वत्वाद्युपाधिरिति महद्गौरवमिति मंतव्यं यदि च निरवछिन्नशक्तिरिति विनाप्येतदा
पि प्रत्येकविनिगमनाविरहाद्व्यक्तावपि शक्तिरावश्यकीति॥तथा हि॥गोत्वविषयकगोशक्तिज्ञानत्वेन कारणता किं वा एतत्
गो विषयकपो गोपदं ज्ञानत्वेनेति प्रत्येकविनिगमनाविरहात् गवि शक्तिसिद्धिः॥एवं च जातिशक्तिकल्पने परमते अधि
कमिति विधेयं न चैवं तथापि गोशाब्दबोधे गोत्वभानं न स्यात् जातेर्व्यक्तिवाचकपदाशक्यत्वादिति वाच्यं॥तत्र नये गोव्य
क्त्यादिभानवत् कार्यकारणभावबलात् ममापि शक्यतानवच्छेदकीभूतगोत्वादिभानसंभवात् एवमशक्यान्वय

स्यापि शाब्देनानंगीकारवत् अंगीकाराच्च। शक्यतावच्छेदकगोत्वादेरनन्तिमविरुद्धत्वाच्च॥ तद्धित्यं। उक्तप्रत्येकविनिगमना
विरहेण प्रत्येकशक्तेः कल्पनायां आनर्थक्यस्यैव विनिगमकस्य जागरूकत्वात्। नहि प्रत्येकं गोव्यक्तिशक्तिज्ञानं गोत्वप्रकारक
शाब्दत्वावच्छिन्नं कारणं व्यक्त्यंतरशक्तिज्ञानादपि गोत्वप्रकारकशाब्दोदयेन व्यभिचारादिति न व्यक्तिशक्तिसिद्धिरिति साधु मीमां
सकानां जातिशक्तिवाद इत्यलमधिकेन स्वमतमुपसंहरति। नस्यादिति। गोत्वविशिष्टेति। तथा च तत्समवायेन विशक्तिरि
तिअर्थः। इत्थं च गोपदात्तादृशाल्लिंगविशिष्टगोबोधोऽन्वयित्वाकारिके तादृशरूपशक्तिज्ञानत्वेनैव हेतुत्वं तादृशालिंगविशिष्टगो
शाब्दत्वेनैव कार्यत्वं। इत्यापद अन्यपदार्थोपस्थितेरेव शाब्दजनकत्वात्। यस्य विषयस्य शाब्दं भवेत् तत्र
तत्रैव शक्तिरिति भावः। अत एव इत्युक्तात् स्मारितिज्ञानमस्तु पदार्था इत्युक्तपाद्य अंशं गच्छतीति न चेति। उक्तदोषः
संकेततानाविषयीभूतव्यक्तिभाने घटाद्युत्पदादिबोधादिप्रसक्तिप्रसंगमपास्यति प्रसंगमपास्य इत्यर्थः। गोत्वसामान्येन॥ तथा च गोत्व १०
सामान्यलक्षणया सर्वत्रैव विशक्तिग्रहान्नातिप्रसंग इति भावः। सामान्यलक्षणां नांगीकरोतां अस्त्वेवेति। अनुगोवाधेऽपि
शक्तिग्रहविषयीभूतेगोबोधोऽपि न स्यादिति निरा आपत्तिः। अतिप्रसंगः। घटादिपदात् पटोऽस्तीति प्रसंगः। शक्तिज्ञानाविषयत्वा
स्याविशेषादिति भावः। गोत्वविशिष्टशक्तिग्रह इति तथा च जातौ च क्वचिच्च शक्तिः। एवं च गोपदं गवि शक्तिरित्याद्या

कारकगोत्वाद्यवच्छेदे गोपदशक्तिज्ञानत्वेन कारणता गोत्वादिप्रकारकशाब्दत्वेन कार्यता। अन्यथा व्यक्तिभाने योग्य
ताबलादिति ध्येयं। अत एव शक्यमनुभववत् स्मरणवाक्यार्थानुभावनात् एकरूपेण हेतुहेतुमद्भाव इति मणि
मतः। संप्रदायमते गोत्वतमस्त्वसंप्रकांशयन्नाह। गव्येवेति। तथा च जातौ न शक्तिः। तथा च व्यक्तावेवेति। त्यादि
स्तत्समुपलक्षणं गोत्वावच्छेदकेति। तथा च यद्धर्मावच्छेदेन यद्शक्तिग्रहस्तद्धर्मप्रकारबोधं जनयतीति नियति नियम
मात् गोत्वेनानुपपद्यते इति भावः। स्यादेतदिति। यदिति शाब्दे व्यक्तिभानान्यथानुपपत्त्या व्यक्तौ शक्तिस्वीकार
इत्यर्थः। तस्य अभेदस्याऽन्वयरूपसंसर्गरूपस्येत्यर्थः। अतिप्रसंगात् घटशब्दान्यदादिबोधप्रसंगात् गो
पदशक्तमेवेति। गोपदं गवान्वयं बोधयतीत्यर्थः। अशक्यबोधने। अशक्यान्वयबोधने इत्यर्थः। गोशक्तं हीति।
तथा च गोशक्तपदज्ञानत्वेन कारणता गोत्वेन रूपेण गवान्वयबुद्धित्वेन कार्यतेति भावः। नहीत्यादिति। अन्वयेऽपी
त्यपि न जातिसमुच्चयः। व्यक्तिस्वरूपेण स्वरूपाथोपस्थितिरन्वयितेति ध्येयं। अन्यजन्यत्वात्। आकांक्षायोग्यताबललभ्य
त्वात् तथैवाक्रीत्याकार्यकारणभावादिति मंतव्यं। शब्दात्तदर्थत्वात्। शब्दशक्यत्वात्। अन्यथा प्रकारांतरेणोपस्थि

नियोगस्यापिशक्तिस्वीकारेलक्षणेति।लक्षणार्थेपिशक्तिस्वीकारप्रसंगादित्यर्थः।प्राभाकरास्त्विति।उक्तुरत्यंतोग्रंथः।
गुरवइत्यर्थः।कार्यतान्वितेति।कार्यताविशिष्टोपस्थितौपरंपरासाधनत्वस्यदुग्रहात्वात्।स्वर्गकामीकार्यंगार्ययार्थं
साधनताबोधार्थंनिय।नित्यंकार्यंअपूर्वरूपंलिंगार्थकल्प्यते।काम्यसाधनताधीजन्यममेदंकार्यमितिज्ञानवत्
स्वर्गकामीकार्यंयागविषयकमितिप्रथमोबोधः।अतोमन्नियोज्यकयागविषयकंकार्यमितिद्वितीयोबोधः।अप
मेवचनियोज्यत्वेनपुंसोऽपूर्वेन्वयः।तदुक्तं।कार्यत्वेननियोज्यंतुआत्मनीरयत्यसौनियोगइतिमीमांसानुतेर
निधीयते।अपूर्वविषयात्मनि।तावन्नत्रनियावनयागविषयानवति।तत्वंतरान्तरदनुत्पत्तेः।कामिस्तुनिश्चिता
यज्ञागविषयानवज्ञागकाम्यसाधनेत्वेननज्ञायतेकाम्यसाधनत्वेनज्ञायमानेएवकार्यताधीद्वाराकामिनस्तु
त्पन्ननान्वियेति।अनुपपत्तिज्ञानसहकृतनशाब्दान्सकोपादानेनयागस्यकाम्यसाधनत्वोपगमानंतरंकाम्यंस्वर्ग ११
साधनंयागःस्वर्गकामोनियोज्यकस्वर्गकामकार्यःइत्यादौपादानिकस्तृतीयोबोधः।अचचअधिकारित्वेनान्वयः।
काम्यस्वनिष्ठस्वर्गेक्रियाकार्यतावगमात्तवोयागस्तुतिराध्यायविनाअनुपपन्नेत्यनुपपत्तिज्ञानसहितेनशाब्देनस्वर्ग

कामोयागकर्त्तेत्यौपादानिकश्चतुर्थोबोधः।एतावतानिनप्रवर्त्तकज्ञानलाभइति।प्रवृत्तिपरंवाक्यंधारीन्तनज्ञानजन
नसाकांक्षंइतिस्वर्गकामस्ययागःअतिसाध्योऽहमपिनथेतियुक्तिप्रतिसंधानसहितेनशब्देनयागोमइतिसाध्यइतिपं
चमोबोधः।तावन्तार्यतमाकांक्षायाअपरिपूर्तेरितिशाब्दनिर्णयेवाचस्पतिमिश्राः।मदुक्तांतनावेबोधद्वयमानुमानिकंमा
नसंचेतिनव्याः।एवंकार्यजातीयेसामान्यतःकार्यताज्ञानजनकत्वस्ययोग्यतावच्छेदकस्यज्ञानादपूर्वेनिष्टयनकार्यताज्ञा
नंजन्यनजनकत्वंशाब्दबोधएवयोग्यताबलान्नासने।यथाघटेनजलमाहरेत्यादौछिद्रेतरत्वेयोग्यताबलान्नासने।अत्र
केचिद्यथायागनिष्ठकाम्यसाधनत्वज्ञानघटितनियोज्यत्वस्याज्ञानान्नप्रथमयागेकार्यतान्वयः।तथायागनिष्ठकार्यत्व
स्याज्ञानान्नप्रथममपूर्वमितिस्वर्गकार्यतान्वयः।यागविषयकत्वस्यवापूर्वस्योपादानात्।अतिसाध्ययागकत्वसैवापूर्वीन
ष्टस्यकार्यतान्वयेयोग्यतावच्छेदकत्वात्एवंचापूर्वोपस्थितौयागनिष्ठकार्यत्वान्वयः।यागनिष्ठकार्यत्वोपस्थितौचापू
र्वेकार्यतान्वयइत्यन्योन्याश्रयः।इत्याहुस्तन्न।प्रथमंयागविषयककार्यइत्येवान्वयबोधात्।स्वर्गकामस्यनियोज्यत
यानवनान्वयः।एवंचयागविषयककार्योपस्थितौतद्द्वारायागेस्वर्गसाधनत्वबोधात्।स्वर्गकामनियोजकोयागः।इतिम

ष्टइतिद्वितीयोबोधः।ततःस्वर्गकार्यताविशिष्ट।तत्प्रयोजकतया।प्रवृत्तिप्रयोजकतयोकार्यताविशिष्टज्ञानेघटानय
नकार्यताज्ञानवान्तत्रप्रवृत्तत्वात्प्रयोजकस्य

प्रयोजकस्येतिशेषः।अनुमिनोमिबालइतिपूर्वमपिस्वप्रवृत्तौस्तनपानादिगोचरप्रवृत्तौतेनबालेनतथाचप्रयोज्य
वृद्धोयंघटानयनकार्यताज्ञानवान्तत्रप्रवृत्तत्वात्।तथावधारयति।कार्यतान्वितज्ञानहेतुत्वेनावधारयति।तन्निर्वाहि
काकार्यतान्वितज्ञाननिर्वाहिका।शाब्दत्वावच्छेदेनकार्यतावाचकपदसमभिव्याहाररहितसहितेनेत्यर्थः।कल्पयति।
विनिगमनाविरहादितिशेषः।तथाचशाब्दत्वावच्छेदेकार्यत्वान्वितंज्ञानमेककारणमितिभावः।आवापोद्वापाभ्यां।त
दीयानयनाद्यन्यांकार्यत्वान्वितेति।तथाचघटपदंकार्यत्वान्वितघटशक्तम्आनयपदंकार्यत्वान्वितकर्मत्वेशक्त १२
मित्याकारकशक्तिग्रहस्यैवतद्धेतुत्वादित्यर्थः।एतादृशशक्तिज्ञानेकार्यताबोधकपदसमभिव्याहारंआहततएवघ

टमानयेत्यादिईदृशशक्तिज्ञानसंबंधेनशाब्दबोधः।ननुघटोनवर्त्ततेत्याद्यर्थवादादावितिनार्थवादाप्रमाणमिति
एवंचनस्वसमभिव्याहृतेघटादौकार्यत्वान्वितइघटादिपदशक्तिशनात्घटपदजन्यस्मारकसत्त्वेघटोपस्थितेर्घ
घटानयनकार्यताशाब्दत्वावच्छिन्नंनभवतीतिनिर्गलितोर्थः।इष्टंचेतिअर्थवादरूपंविधासमभिव्याहृत।व्यव
हारस्त्विति।तादृशशब्दात्व्यवहारस्त्वित्यर्थः।ननुयदानींकार्यतान्वितशक्तिज्ञानत्वेनैवसामान्यतएवशाब्दत्वा
वच्छिन्नंप्रतिचोपयुक्तत्वेतदाकथंसिद्धार्थानांमूकत्वमित्याशंकेत।नन्विति।कार्यत्वान्वितवाचकत्वात्कार्यतान्वि
तशक्तत्वात्।नन्वित्याद्याशंकापरिहरतिवच्यतइति।आनुभाविका।शाब्दानुभावजनिका।स्मारिका।पदार्थस्मृ
तिजनिकाकार्यतान्वितेति।तथाचपदानांकार्यतान्वयानुभवेप्रतिकार्यतान्वितशक्तिज्ञानत्वेनकारणताएवंच
कार्यतान्वयानुभावकःशाब्दप्रमाणंतत्रचकार्यतावाचकपदजन्यकार्यत्वोपस्थितिःकारणमितिभावः।स्मारिका
चेति।तथाघटादिपदात्शक्तिज्ञानसहकृतात्।केवलंघटविशेष्यकघटत्वजातेःस्मृतिः।तत्रशक्तिज्ञानंपदा
र्थस्मृतौनतुबोधकतयाकारणमित्यर्थः।आनुभाविकायांशक्तेर्वैलक्षण्यमाह।नचान्वेतितदन्वितःबोधे

कार्यत्वाचित तु बोधे कार्यत्वान्वितबोधे कार्यत्वोपस्थितेर्हेतुत्वादित्यर्थः॥ इतिनार्थवादस्येति। कार्यत्वान्वितेनोप
स्थापकपदाभावात्कार्यतानुपस्थितौ कथं कार्यत्वान्वयबोधः स्यादिति भावः॥ प्राभाकरमतं दूषयति। नन्वे
ति। आवापोद्वापेन वृद्धानामानयनादिव्यवहारेण। अन्यलभ्यत्वात्। इति कार्यतावचकलिंगादिपदात्कार्यत्व
स्य तदृश्यस्य च संसर्गमर्यादया भानसंभवात् किं घटादिपदस्य तत्रापि शक्तिकल्पनमेवेत्यर्थः॥ प्रथममिति।
बालस्याद्यशक्तिग्रहकाले मदाच तदुपस्थितमिति कार्यताशा। नेपदादिना कार्यान्वितत्वान्वयोपस्थितमित्यर्थः॥ सो
कार्यान्वितघटादौ घटपदादेः शक्तिरित्यर्थः॥ गौरवादिति। घटपदस्य लाघवात् घटे शक्तिर्न तु कार्यान्वितघ
टे गौरवादित्यर्थः॥ नहीति। प्रवृत्तत्वं ज्ञातत्वं वा शास्त्रजेति। शतयोजनपरिमितया स्वीकृतचंद्रनारादिपरिमाणेन
प्रत्यदृष्टस्य सूक्ष्मपरिमाणबाधनापत्तेरित्यर्थः॥ ननु बोधवद्विषयकत्वमेव बलवत्त्वं तच्चेत् प्रथमप्रतीतौ यदा १३
सिद्धं तदा प्रथमप्रतीतेर्बलवत्त्वमत आह। चरमेति। तथा च चरमप्रवृत्तशक्तिर्लाघवसहाये न बोध्य प्रथमप्र
वृत्तकार्यान्वितघटादौ घटादिपदशक्तिज्ञानं बाधितं। लाघवात् घटादिपदस्य शुद्धघटत्वमेव शक्यतावच्छे

दकं न तु कार्यान्वितघटत्वमिति तदवच्छेदेन शाब्दाभावात् बोध्यशक्तिवत् विषयत्वाभावान्न प्रथमप्रतीतेर्ब
लवत्त्वमपि चरमप्रतीतेरेवेति भावः। ननु कंबुग्रीवादिमान्नास्तीत्याद्यनुभवबलात् गुरुरूपिण्या शक्यतावच्छेद
कस्तथा कार्यतान्वितघटत्वं गुर्वप्यनुभवबलात् शक्यतावच्छेदकमपि भविष्यतीत्याह। किंचैवमिति। एवं यदा नो का
र्यान्वितशक्तिज्ञानस्यैव शक्तत्वावच्छेदेन कारणत्वे अन्वयानुभवो न स्यादिति। अनुभाविकार्याकार्यतान्वितशक्तौ
कार्यतावाचकपदं नन्वकार्यत्वोपस्थितेरपि हेतुत्वस्यावश्यकत्वस्याभावादित्यर्थः॥ तदापत्तेः॥ असंसर्गाग्रहापत्तेः॥ नन्वेवं
सति शाब्दयामीत्यनुव्यवसायापत्त्यापत्तेरत आह किंचैवमिति। प्रामाण्यं न स्यात्। शाब्दप्रमात्वस्वरूपयोग्येन स्यादित्य
र्थः॥ कार्यतावाचकलिंगादिसमभिव्याहाराभावादिति भावः॥ बुद्धबंधुः॥ बाह्यविशेषणा बुद्धनामा तद्बंधुरित्यर्थः॥
स्मृतिपुराणादीनां सिद्धार्थानामप्रमाण्याभ्युपगमेनेति भावः॥ वर्णाव्यत्ययः कस्य तस्य व्यत्ययोरकः। लिपिसादृश्यं
नातानयोः सादृश्यं गौडलिप्यभिप्रायेण बोध्यो। तथा च प्रतारकोऽप्रभाकरत्वेन गृहीत इति भावः॥ तीरप्रत्ययेति॥ गं
गापदस्य तीरे शक्त्यभावादित्यर्थः॥ तत्वेन शक्तित्वेन। प्रयोजिका ज्ञाता सत्युपयोगिनीत्यर्थः॥ किं त्विति वृत्तित्वेन प्रयो

जिकेति ह्रुवान्वयीवृत्तित्वं च शक्तिलक्षणान्यतरत्वं इति ध्येयं। लक्षणं निरूपयितुमाशंकते। अथेति। शक्यादिति। त
या च शक्याद् गापदाद्दशकास्यतीरस्योपस्थितिरेव लक्षणा सा च स्वरूपहेतुरिति भावः॥ दूषयति उपस्थितिर्हेतुरि
ति। तादृशस्योपस्थितिहेतुवृत्तिर्नतु सैवोपस्थितवृत्तिरित्यर्थः। कस्यचिन्मतं दूषयति। दूषयिष्यति। अशक्येत
त्पर्येति तथा चान्वयबोधविषयीभूतनाशक्यतात्पर्यं लक्षणेत्यर्थः॥ दूषयति। अन्वये। पीति। अन्वयस्याशक्यत्वात्
तात्पर्यविषयत्वाच्च। अन्वये पदानां लक्षणापत्तेरित्यर्थः॥ तथा चान्वये शक्तिर्लक्षणेति। सिद्धान्ताकोपापत्तिरिति
भावः। ननु अशक्ये पदार्थे तात्पर्यं लक्षणेति वाच्यं। तथा चान्वये तात्पर्येति न लक्षणा तस्यापदार्थत्वात्। अत आह वि
चेति। तात्पर्येति॥ तथा च तात्पर्यं तत्प्रतीतिइच्छा सा सा च प्रत्यये सति यथार्थसिं भवति। तत्प्रत्ययश्चाशक्तउपस्थिति
उपस्थितिश्च वृत्तिरेवेत्येवं तात्पर्यनि। वाहिकावृत्तिरित्यर्थः॥ ननु तदात्मिका ननु तात्पर्यात्मिवृत्तिरित्यर्थः॥ तत्वा १४
पत्तेः। तात्पर्यात्मकत्वापत्तेः॥ यद्यपीश्वरेच्छारूपशक्तेस्तात्पर्यात्मकमेव तथापि वक्तृसामान्यतात्पर्यात्मकत्वापत्तेरित
र्थः। लक्षणास्वरूपं समाधत्ते। स्वशक्येति। गंगापदादित्यादि तु शक्यं प्रवाहस्संयोगः। संबंधस्तीरइति गंगापदस्यती

रलक्षणासूपपन्नेत्यर्थः॥ इदमेवस्थापयति। असिद्धेति। सा निरूढाइत्यर्थः। द्विविधमेवाह। गौणीशुद्धा चेति। दूषणात्मकइ
त्यर्थः॥ परे तु सादृश्यपदार्थान्तरमित्याहुरित्यर्थेति। वाहिको नारवाहिकः॥ तथा च वाहकत्वेन गोसादृश्यं। वाहिके संबंधःत
था च संबंधः तथा च गौण्या लक्षणया गोःसादृश्योपस्थितौ वाहिकेनान्वेदान्वयः एवं च गोःसादृश्यान्नित्रवाहिकइत्य
न्वयइत्यर्थः॥ एवं सिंहो माणवकइत्यर्थः॥ द्वावपि सिंहसादृश्यो माणवकइत्यन्वयोपि गौण्येव न लक्षणेत्याद्युपातदन्वे
ति। शक्तिसादृश्यान्यत्राशक्यसंबंधरूपाइत्यर्थः॥ नन शक्तेर्न लक्षणान्वमिति मंतव्यं। आपुर्छनमिति। आपुःपदे आपुर्जनके
लक्षणा तथा च आपुर्जनकाभिन्नं छनमिति बोधः। एतदेवेति। शक्तिलक्षणैवेत्यर्थः॥ पष्ठ्यर्थेनानइति। पष्ठ्याः प्रभावे
ननु शक्तिलक्षणयोः। रंत्यन्तरस्यापसत्वादिति भावः। नहीति। शक्तं इत्युपलक्षणं न बालाक्षरात्रिकइत्यपि बाध्यं। ना
मार्थयोःभेदेनान्वयसाव्युत्पन्नतया राजपदलक्ष्यार्थराजसंबंधपुरुषपः। पुरुषपदशक्यार्थपुरुषस्य परस्परं अन्व
यासंभवादिति भावः। अत्र केषांचित्समाधानमाशंक्य निराकरोति। अथेत्यादिना। अन्वयविधयासंसर्गतयेत्यर्थः॥ नीलो
घटइत्यत्रेति। तथा च नीलो घटइति। अत्र मते धर्मीयथा अभेदः संसर्गतया ऽभासते तथा राजपुरुषइत्यादौ पष्ठ्या

र्थसंबंधोप्यन्वयविधयाभासतइत्यर्थः॥इष्यतेराजपुरुषाइत्यत्रापीति॥भेदापत्तेःसंसर्गविधयासंबंधभानापत्तेरितया
भाननिरासः॥तथाचराजपुरुषइत्यत्रअभेदेनैवान्वयोवाच्यःसचनसंभवतिबाधादितिभावः॥नन्वेवंराज्ञःपुरुषइत्यादौ
कथंराजपुरुषयोर्भेदातिरिक्तसंबंधेनान्वयइत्यतआह॥राज्ञःपुरुषइत्यत्रेति॥तथाचनामार्थयोरन्वयःकिंत्विति॥राज्ञ
इत्यत्रषष्ठीविभक्त्यर्थपुरुषयोराश्रयाश्रयीभावेनैवान्वयःनतुनामार्थयोरन्वयइत्यर्थः॥तद्भिन्नेभेदातिरिक्तसंबं
धेननामार्थयोरन्वयोरन्वयस्याव्युत्पन्नत्वेहीत्यर्थः॥तयोःराजपुरुषयोस्तथान्वयःअभेदातिरिक्तषष्ठ्यर्थसंबंधेनान्व
यइत्यर्थः॥इतिवदन्वयःस्यात्॥शाब्दबोधःस्यादित्यर्थः॥तद्भिन्नेतिनामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वयातद्दोषस्यता
दवस्थात्इत्यर्थः॥समुदायएवेति॥समासवाक्यस्येत्यर्थः॥शक्तिविरहेणेति॥वाक्यशक्तत्वेनलक्षणानुपपत्तेरित्यर्थः॥इ
दमेवाहशक्यसंबंधोहीति॥तथाचवाक्येशक्यत्वाभावेनशक्यसंबंधलक्षणायाअप्यनुपपत्तेरित्यर्थः॥राजपदमिति॥तथा १५
चराजपदेराजसंबंधीनिलक्षणा॥तस्यचपुरुषपदोपस्थाप्यअभेदेनैवान्वयइत्यर्थः॥एवंचविग्रहवाक्यसमासवाक्यस
मानार्थकत्वव्युत्पत्तिरप्रयोजिकेतिमंतव्यं॥एवंषष्ठीसमासेपिअभेदान्वयस्वीकारेकर्मधारयेति॥तत्राभेदान्वयस्यसर्वसि

द्धत्वादितिभावः॥समासपूर्वदशायामिति॥राजसंबंधवान्इत्येवबोधः॥लक्षणापूर्वपदेसतिसमासेक्रीयतेवाक्यापत्तिन
वानुरोधात्ननुसमासपूर्वराजपदेपुरुषपदेपिलक्षणेत्यर्थः॥पदयोःराजपदपुरुषपदयोरित्यर्थः॥तुल्यार्थत्वाभावादिति॥
समासपूर्वमभेदानुभावाभावेनेत्यर्थः॥द्विपदत्वेतुल्याधिकरणेत्यर्थः॥विज्ञेयः॥कर्मधारयइत्यनुशासनात्॥तुल्यार्थकयो
रेवपदयोःकर्मधारयःस्वीक्रियतइति॥एवंचसमासपूर्वदशायामपित्वान्भेदधीस्तत्रैवकर्मधारयइतिभावः॥सर्वसैवशक्ति
त्वमानात्शाब्दस्वीकारेनचदोषादीनांविशिष्यकार्यकारणभावकल्पः॥रूढीति॥अवयवशक्तेसमुदाययोरभावात्लक्षणेत्य
र्थः॥स्फुटयति॥तथाहीति॥चित्रत्वस्येति॥चित्रंविशेषणतयोपस्थितस्येत्यर्थः॥गवान्वयलक्षणयागोपदोपस्थाप्यगोस्वाम्ये
कदेशगवीत्यर्थः॥तस्यगोपुरुषस्यार्थस्यएकदेशत्वात्गोस्वामीरूपविशिष्टार्थदेशत्वात्॥तथाचपदार्थेनान्वेतिनतुपदा
र्थैकदेशइतिव्युत्पत्तेर्नान्वयः॥संभवतीतिभावः॥अतएवपदार्थैकदेशेअन्वयादेव॥गवानन्वयेति॥चित्रस्वामीरूपचि
त्रपदार्थैकदेशेचित्रएकदेशत्वेनगवान्वयासंभवादित्यर्थः॥इदमायातंततःफलानुरोधित्वात्कल्पनायाःव्युत्पत्तिवैचि
त्र्यस्यापिवक्तुमशक्यत्वात्विनिगमकाभावादिति॥तथाचनोचयमेयदतात्पर्यग्राहकंवैयर्थ्यात्॥एकपदस्येति॥किंतु

यदैकपदेन लक्षणाप्रतिसंधानात् शाब्दबोधस्तदा अपरपदं तात्पर्यग्राहकमित्येव मुन्नयपदेपि लक्षणेति भावः समुदाये
चित्रगुरित्यादि बहुव्रीहिसमासवाक्ये इत्यर्थः। केचिद्व्याकरणा इत्यर्थः। पदद्वयेति। चित्रपदे गोपदे वा लक्षणा विशिष्टा
र्थे चित्रगोः स्वामिनीत्यर्थः। नत्विति। अनन्यलभ्यस्यैव शब्दार्थत्वेन समुदाये शक्तिरयुक्तेति भावः। न च तदुन्नयपदे लक्षणा
पेक्षया समुदायशक्तिकल्पनयैव गौरवमित्यर्थः। लघीयसीति वाच्यं पदानां शक्तिलक्षणासिद्धैव सर्ववादिनो न तु स
मुदायशक्तिः। तेनापकापि कल्पनेति। आक्षेपतः कल्पनेन वगौरवमित्यर्थः। वस्तुतो तु पदं तादि पदादेकार्थेन नानाप्रका
रकबोधजनकत्ववत् एकपदे लक्षणया। यत्तु चित्रपदस्य चित्रस्वामिनि गोपदस्य गोस्वामिनि लक्षणया। व्यक्तिवच
नन्याये चित्रत्वेन गोत्वेन एकस्या एव व्यक्तेर्बोधः। आरूढवानरमित्यत्र अरूढपदे तत्तरं तत्पुन्नयस्य कर्तृसंबंधिनि
वानरपदस्य वानरसंबंधिनि लक्षणा पक्वेरित्यादिवत् व्युत्पत्तिवैचित्र्यात् देशापि प्ररोहनादेवान्वय इति तन्न। चित्रगोस्वा १६
मीत्याकारकान्वयबोधस्य सर्वानुभवसिद्धस्य उपपादितुमशक्यत्वादिति दिक्। इतिध्येयं नव्यास्तु उत्तरपदएव
लक्षणा न तु पूर्वपदेपि विनश्यत्यर्थान्वयानुपपत्तेः। अत्र तथापि तस्यार्थबोधजनकत्वे प्रत्ययानामिति व्युत्पत्तेरिति।

दुःशक्यानामादिति। शक्यसंबंधो लक्षणेति न शक्यानामपि लक्षणान्तावेगमनुपपत्तेरित्यर्थः। स्वबोध्येति। इदमेव विमृद
यति। अस्ति हीति वाक्यस्य चित्रगोसमुदायस्य विशिष्टबोध्यं चित्रगो बोध्यत्वे। त्यर्थः। तथा च न संबंधि चित्रगोस्वामिनि
निस्वबोध्यसंबंधरूपा लक्षणा सुपपन्नेति भावः। नचैवमपभ्रंशस्यापि शक्तिभ्रमेण बोध्यसत्त्वात् तत्रापि लक्षणास्यादि
तिवाच्यं इष्टत्वात्। अन्यथा समुदाये लक्षणानावे गंगायामित्यनन्वयेनि। तीरगनीरत्वबाधादिति भावमप्यनन्वयेवि
रुणानि। नहि तीरनदिति। उपसंहरति तस्मादिति। बोधकतावच्छेदकेति। विशिष्टार्थबोधकतावच्छेदकेत्यर्थः। अथकिं
तद्बोध्यत्वं हि तज्जन्यबोधस्य विषयत्वं शाब्दबोधस्य नानाघः। कारणत्वादि संबंधेन घटपदस्मारितगगनादेः संबं
धग्रहादुपस्थितस्याप्यन्वयबोधापत्तेः। शक्याद्बोध्यत्वाभिधानेन वाक्ये लक्षणा। वाक्यशक्तौ च निर्वाहात् शक्तेरपे
क्षया गौरवं चानद्वितीयः। गंगायां घोष इत्यादौ गंगापदे लक्षणाविरहप्रसंगात्। तेन गंगापदेन प्रवाहशाब्दबोध
जननात्। शक्तिमत्त्वैव बोधजनकत्वेनान्योन्याश्रयात्। अपि च तत्त्वेन विरोधकता अन्नीधीयते। बोधकतामात्रं वा
नाद्यः। चित्रगोसमुदायज्ञानत्वेन न बोधकता किंतु चित्रादिशाब्दबोधे चित्रादिपदज्ञानत्वेन चलापवातानेनरः। गं

गायां घोष इत्यादावपि गंगागंगासमुदायस्य लक्षणायां समुदायैवैयर्थ्याभावात् । वस्तुतस्तु साक्षात्तारं भरा
संबंधेन शक्तिर्वा लक्षणेति न बोध्यसंबंधस्य लक्षणात्वसंभवः । नापीति । रिक्तं स्वचः । अर्थशून्यं वच इत्यर्थः । अ
त्रैव परमते दूषणांतरमप्याह किं चेति । विभक्त्यंतत्वाभावस्य वाक्यस्येति शेषः । प्रत्यया न वाक्यस्य नदीतीरल
क्षणायां तीरे आधारताप्रत्यायकविभक्त्यभावादिति भावः । इति भागस्य सप्तमीशून्यस्येत्यर्थः । अबोधक
त्वात् । विभक्त्यंतस्यैव वाक्यबोधकत्वादिति भावः । ननु बोधकत्वे वाक्यस्य शास्त्रेण न द्वाराद्याप्याकांक्षादि
मात्रादपि संभवतीत्यत आह बोधकत्वेयीति । लक्ष्येतारस्तूपलक्ष्यार्थे । अनन्वये बीजमाह नहीति ॥ स भागः
विभक्तिरहितनदीतिवाक्यात्मकभाव इत्यर्थः । तथा च पदस्यैव प्रकृतित्वेन तु वाक्यस्येति । वाक्यार्थस्तेती
रे कथं सप्तम्यर्थाधारत्वान्वयः । वाक्योत्तरं सुपि विभक्तेरदृष्टत्वात् । वाक्यस्य प्रकृतित्वेऽपि तु पदस्यैवेति भावः । १७
ननु प्रकृतित्वं दित्थकपित्थादिसमुदायानामिव प्रकृतेनापि न विषयेत्यत आह गंभीरायामिति । सप्तम्या अन्व
यिता न दीपदोत्तरसप्तम्या एव लक्षणार्थे आधारत्वान्वयसेन देगभीरायाः वर्तमानसप्तम्यर्थः पदैकत्वस्यासंभवा

दिति भावः । अथ विभक्त्यंतस्येति । गंभीरायां नद्यां इत्यस्य अशक्तत्वात् तथा च शक्यसंबंधो लक्षणेति विशिष्टवाच
स्य शक्याभावात् लक्षणानुसंधानं न भवतीति भावः । उपसंहरति । तस्मादिति । पदद्वये गंभीरपदे नदीपदे चेत्यर्थः ।
परस्परे विशिष्टनदीतीरे गंभीरनदीतीरे इत्यर्थः । नचेति । एकपदलक्षणैव तात्पर्यविषयार्थबोधे अपरपदवैय
र्थ्यमित्यर्थः । परस्येति । विनिगमनाविरहादन्यायन्यापदे लक्षणासिद्धौ यदेकपदे लक्षणानुसंधानानुरोधो
दयस्तदापरपदतात्पर्यग्राहकमिति । निर्गलितोर्थः । समुदाय इत्यनेनाप्यस्वरससूचितः । सचोन्यपदे विनि
गमनाविरहात् लक्षणोत्पत्त्युक्तमेवेतत् । किंतूत्तरपदमेव विभक्त्यर्थान्वयानुबोधकमित्यादितमेव प्राक् पूर्वप
दे तात्पर्यग्राहकमित्यादि तथा चोत्तरपदलक्षणायां विशेषणविभक्तिसाधुत्वार्थिका न तु विशेष्यविभक्तिरिति भा
वः । विस्तरस्त्विति । नामार्थयोः धात्वर्थनामार्थयोश्च भेदेनान्वयबोधस्य समासातिरिक्तएवाक्तत्वात् तत्वच
समासघटितपदभिन्नानामत्वं फलानुरोधित्वात् कल्पनायाः । एवं च राजपुरुष इत्यादौ पुरुषादौ समुदायशक्तौ
राजादेः लुप्तषष्ठ्यानुरूप्यार्थसंबंधो ग्रामं गत इत्यादौ गमनादौ ग्रामादेः कर्मत्वादिकं च संबंधतयैव भासते अतए

राजपुरुषादौ समुदायशक्तेर्लक्षणाया वा पदलक्षणायाः सुतरां विनिगमकाभावप्रतिसंधानमन्तरेणापि जायमानः सर्वानुभ
सिद्धो राजपुरुषादिबोधो निराबाधं पदमादधातीत्येवं च पुरुषादौ राजसंबंधप्रकारिका कादाचित्का धीरुपप
द्यते राजादिपदस्य राजादिसंबंधलक्षणाया एवं तदानुपगमात् एवं बहुव्रीहौ चित्रगुरित्यादौ गोपदात् शक्त्या गो
लक्षणाया वा गोस्वामिन उपस्थितौ चित्राभिन्नतया गोः स्वामिनि अन्वयात् चित्रगोस्वामिनोपच तीर्थादौ जलत्वे वर्तमान
त्वयोरिव एकपदोपस्थाप्ययोरपि क्वचित् परस्परान्वयबोधानुपगमात् युगपद्वृत्तिद्वयविरोधस्तु गोपदस्य गंगा
यां घोषमत्स्यौ स्त इत्यत्र गंगापदस्येव तात्पर्यसत्त्वात् नास्तीति विभावनीयं। अथैवं पंकजमित्यत्र पद्मस्य पंकस्यैव पद्मत्वविशि
ष्टलक्षणाया अन्वयबोधापत्तौ तत्र समुदाये रूढिशक्तिर्न स्यात् तद्ज्ञानेन समुदायशक्तिभ्रमेणावसमासवत्त्वेऽन्वय
बोधस्योपपादकत्वात् न च पंकजनिकर्तृकुमुदबोधप्रतिबंधार्थं रूढिशक्तिर्नैष्ठिकसमुदायवाचकत्वेन स्वीक्रियत इति वा १८
च्यं सति तात्पर्यादौ विनापि लक्षणां तद्बोधस्येष्टत्वात् अन्यथा तद्बोधापत्तिरिति चेत् स्यादेव यदि समुदायेशक्त
यविषयोऽनन्यथासिद्धः एकपदार्थयोः परस्परान्वयबोधेऽन्यस्य पंकजन्मकर्तृपद्मलक्षणायां दुर्वारत्वात् बहुव्री

हौ स्वपदार्थैकदेशान्वयतात्पर्यग्रहकृतस्यैवैवमुपपत्तेरिति दिक्। उपकुंभमिति। कुंभपदे कुंभसामीप्यसामीप्यसीपदे तत्संबंधलक्ष
णेत्यर्थः। वस्तुतो नोत्तरपदेऽपि लक्षणा अव्ययेन निपातेति निरूढलक्षणैव चैनामाख्यपदे नान्वयस्यायुक्तत्वात् उपाध्यायसामीप्ये
शक्त्या लक्षणया उपाध्यायसंबंधस्यापि अन्वयबोधसंभवाच्च इत्युपकुंभमित्यादौ इवार्थसादृश्ये चन्द्रादेरिवान्वयबोधस्या
नुभवसिद्धतया पूर्वपदेऽपि संकोचस्यावश्यकत्वादिति भावः। तत्र पदद्वयलक्षणायैवोपपत्तौ शाब्दबोधोऽत्राव्ययीभावसमा
सशक्तिकल्पनमयुक्तमिति। अन्यलभ्यत्वात् उत्तरपदलक्षणालभ्यत्वात्। अनन्यलभ्यस्यैव शब्दार्थत्वादिति भावः।
एवं निर्मक्षिकमित्याद्यव्ययीभावेऽपि उत्तरपदे लक्षणा बोध्येति ध्येयं। समाहारे नो निर्वहति न शक्तिमिति। द्वंद्वसमा
हारे शक्तिरिति कस्यचिन्मतं दूषयितुमाह। समाहारद्वंद्व इति। प्रतियोगिकमिति। लक्ष्यतात्वन्वयी। तथा च पाणिप्रतियो
गिकाभिन्नपादसमाहारशक्तिबोधः समाहारे चैकान्वयः इति। एतेन एकत्वसंख्याया अन्वयोपपत्तिः पाणिपादं एवेति वक्ष्यम
ाणमिति कस्यचिद्दूशि। न प्रयुक्तमित्यर्थः। परे तु समाहारशक्तिं दूषयन्ति। न पाणिपादे ति। अन्यलभ्यस्यैव शक्यत्वा
दिति शायुक्त एवामपि हेतुरिति भावः। ननु समाहारान्वयोः संबंध एव वाच्यः तत्र च कथं द्वित्वाद्यर्थकमेव द्वंद्व इत्यत आह।

समाहारश्चेति॥ ननु एकक्रियान्वयित्ववादनादिरूपैकक्रियान्वय एव वाच्यः॥ स च संबंधिभेदान्भिन्न एवेत्यननुगमइ
त्यत आह॥ सेनावनादिवदिति॥ अपेक्षाबुद्धिविशेषविषयत्वेवाकार इति नाननुगम इति॥ भावः ननु निरुक्तसमाहारेपि
वादनकर्मत्वात् एकत्वे॥ पूर्वोक्तदोषापरिहारादित्याशंक्याह नन्विति॥ समाहारे पादपदलक्षणार्थ इत्यर्थः॥ वादनकर्तृत्वाना
वात्तथा च वादनकर्तृत्वं पाणिपादयोरेव न तु समाहारस्येति भावः॥ परस्परयेमिति॥ स्वाश्रयसंबंधित्वलक्षणायेत्य
र्थः॥ एकेत्यनेनास्वरसः सूचितः॥ स च साक्षात्संबंधेनान्वयबुध्यमानबोधापत्त्यापत्तेः॥ समाहारोत्तरविभक्त्यर्थेति॥ स
माहारलक्षकपादादिपदोत्तरविभक्त्येत्यर्थः॥ समाहीयमाणेष्वसमाहाराश्रये पाणिपादे इत्यर्थः॥ इत्येवं स्फुटयति॥ समाहीय
मानेति॥ तथाकांक्षायाः एक एव कार्यकारणभावात्॥ अयं समाहारबोधकसमभिव्याहृतनामपदेजन्यायस्थितेः॥ समाहा
राश्रयोपस्थितिमंतरेणान्वयानुभवाभावात्॥ समाहीयमानपाणिपादोपस्थापकपदमादाय पदमाकांक्षेत्यर्थः॥ समाहारस १९
मानाधिकरण्येति॥ तथा च सत्यं न्योन्यैवेत्साकांक्षत्वात् समाहारवाचकपदोत्तरं द्वितीयादिविभक्तिः॥ तस्मानाधिकरण्ये
नैवतदर्थोन्वयसाकांक्षत्वादित्यर्थः॥ आकांक्षायाः अन्यादृश्यायाः अन्यादृश्यवकार्यकारणभावकल्पनमेव चारसाम्ये

नेत्यनेनस्वरसूचितः॥ पाणिपादमात्रप्रतीतेरित्यत्र मात्रपदेन समाहारव्युदासः॥ समाहारलक्षणेति॥ अत्र एकदे
शलक्षणेतिन्यायानुयायिनः॥ समुदायलक्षणेति जैमिनीयाः॥ वैयाकरणमतं दूषयति॥ शक्तिर्येति॥ समुदायशक्ति
रित्यर्थः॥ नन्वेवं पाणिपादे हस्त्यश्वरथ इत्यादौ समाहारत्वं धवखदिरपलाशा इत्यादौ इतरेतरत्वं कथं एवं समा
हारानुपस्थितौ द्विवचनापत्तिरिति॥ पाणिपादयोरुभयत्वादित्यर्थः॥ तथा चात्र मते तु समाहारस्यैकत्वादेक
वचनरूपपत्रमित्यर्थः॥ असाधुत्वादिति व्याकरणनिरस्यत्वादित्यर्थः॥ अत आह॥ इतरेतरसमाहारेति॥ नदी वृद्धी
त्यसमाहारेनदीत्याद्युत्तरस्येति वृद्धिरित्यानुशासनात्॥ यथा स्त्रीशब्दादेर्नदी वृद्ध्यादिसंज्ञकत्वं पारिभाषिकं त
समा थाहारे इतरेतरसमासयोः पारिभाषिकेतरद्वंद्व इतरेतरत्वसमाहारत्वसंज्ञेत्यर्थः॥ यत्र च हस्त्यश्वं प्रमेयं पाणिपा
दमभिधेयमित्यादौ समाहारोनुभूयते॥ अत्र लक्षणैवानुपेयते॥ अत एव हस्त्यश्वद्वयं पादौ विनापि द्व्यपदल
क्षणामन्वयः॥ उपपद्यते इति ध्येयं॥ आनुभाविकमव्याः॥ अनुभवानुयायिन इति यावत्॥ आनुभाविका इत्यनेन प्रामा
णिकत्वं सूचितं भवतीति भावः॥ इतरेतरद्वंद्वसंप्रदायमतमाह॥ धवखदिरौ विविधवखदिरावित्यादौ त्यर्थः॥ वयंतु

पलक्षणो। समस्यमानपदार्थमात्रस्यैव प्रतीतेरित्यर्थः। न च लक्षणाशक्तिर्वैत्यच इतरेतरद्वंद्व इत्यादि। तथापि इतरेऽपि
स्वोक्तेप्रामाणिवसामंतिमाह। नद्वाहुरिति। शाब्दिकाः आहुरित्यर्थः। साहित्यानि। साहित्यबोधकद्विवचनबहुवचनादिक
द्वंद्वसमासो वा नवतीति भावः। साहित्यं किं तदाह। अत एव निरुक्तसाहित्यस्य इतरद्वारादिवाच्यत्वादेव सहभावमात्रस्य
ीयत इति शेषः। ननु साहित्यं निरुक्तसाहित्यमित्यर्थः। इदमेव यागाद्यावित्ति। तुल्यवदिति। तथा च तुल्यवदन्वयाभावान्नता
हित्यं तत्र ज्ञानीयत इत्यर्थः। आहुरित्यनेनास्वरसः सूचितः। स च धवखदिरपलाशान् छिंधीत्यादौ धवखदिरादिनां धवत्वादिनैव
न्वयः। सर्वोनुभवसिद्धरुचिक्तसाहित्यं नेत्यादि इत्यादौ कर्मधारयइविशेषः। अन्वयविधया संसर्गविधया च नशक्तिरिति। अने
द्नयाक्तिर्नेवालक्षणेत्यर्थः। अत एव। उक्तमुक्तेरेव तत्पुरुषेपत्या अनुमितिधारायागादिक्तिपान्वयः। पुरुषस्य साक्षात्संबंधे
नित्यर्थः। तत्रापि षष्ठीतत्पुरुषे पूर्वपदे राजपदादौ प्रसंगान्नञ्तत्पुरुषशाब्दबोधमाह। नञ्तत्पुरुषमिति। तथा च अघटः २०
पट इत्यादौ घटसंबंधिभिन्ने राश्रयः पट इत्यन्वयबोध इत्यर्थः। शक्तमेदेतावकारुव्यर्थौ। अपि च भिन्नत्वमेवैष वचना
न्यान्यानावपि शक्तमित्यर्थः। इति तेन संबंधघटसंबंधिनो। नेदे नेवान्वयो नवतीति स्पष्टं। योनाशंकते। संसर्गाभाववाच

कत्वमिति। लाघवेति। संसर्गाभावत्वापेक्षया अन्योन्याभावत्वस्य लघुत्वादित्यर्थः। ननु प्रामाणिके गौरवं न दोषायेति संसर्गाना
वच्छेमवनञः शक्यतावच्छेदकं तत्राह। विनिगमनाविरहेणेति। तथा च नियामकाभावेन संसर्गाभाववत्वदन्योन्याभाव
त्वमिति शक्यतावच्छेदकमिति नानाथैवनञः अत एव नञर्थाः षट् प्रकीर्तिता इति घोषः। न घटः पटवदिति। तथा चान्ववघट
पार्थयाघटपदस्य संबंधिलक्षणां विना अन्वयस्तथापन्नेपि न विष्यतीति किं घटपदस्य संबंधिनि लक्षणनयेतीत्यर्थः। प्र
थमायाः प्रथमो न तु प्रथमायाः षष्ठीन इति यथा मातुः स्मरतीत्यत्र मातरं स्मरतीत्यर्थकत्वेन द्वितीयषष्ठीकर्मत्वशक्ता अपि तु
लाक्षणिकीत्यर्थः। अनुशासिनिकी अनुशासनसिद्धेत्यर्थः। तुल्यमिति। शेषषष्ठी कर्मणि चाषष्ठी तु नक्तत्वात्। अत एव नञे
घो नोऽस्मरणयोरित्यादि सिध्यति। एवं च शेषषष्ठी तस्य शेषेकारकप्रातिपदिकातिरिक्तेर्थे संबंधरूपेषष्ठीत्यर्थः। इ
त्यर्थः। तथा च संबंधत्वरूपेण प्रथमार्थेपि षष्ठ्यर्थः। स चार्थः। प्रथमाबोधनेवेलक्षणैवेति तिंवत्यनुशासनि। का ही
तिं भावः। स्वोक्तेप्रमाणतदिदमाहुरिति। अव्ययाः इति। तथा च नञ्वार्थानां नियमतो नामार्थप्रकारत्वात् निरूपितविशे
ष्यतयैवचानियमात्। एवं च अन्नेदातिरिक्तसंबंधेन तत्र नामार्थघटादेः प्रतियोगिनो रन्वयेविनक्त्यर्थेत्वसंबंध्य

कारतयैवान्वय इति भ्रमायाः। षष्ठ्यर्थसंबंधलक्षणेति सर्वसमंजसं। शंकते पुनस्तत्र तथापीति। समाधत्ते नञस्तत्रे
ति। ततः न घटः पट इति वाक्यात् नञ्पदमिति। इष्टं च एतेन सप्तमनेदान्वय इति न कोपि दोष इति भावः। तस्य अभाव
स्य पदार्थैकदेशत्वात् अभावपदलक्ष्यार्थीभूत अभावैकदेशत्वादभावस्येत्यर्थः। ससंबंधिकेति। अभावस्य ससंबंधि
कतया एकदेशान्वयस्यापि स्वीकारादित्यर्थः। अथेति। नञ्त्वेन जन्यपुरत्वे तत्र तस्य यथा चैत्रादेर्यथा निरुक्त नञ्पदा
र्थैकदेशे जन्यथा तानिरूपके जनकत्वे अन्वयस्तथेत्यर्थः। अन्वेन्विति। समुदाय एव नञ्पदार्थो भाववत्त्ये वइतरपदार्था
न्वयी प्रतियोगिवाचक घटादिपदार्थान्वयः इत्यर्थः। ननु नञ्पदार्थसमुदाये अभाववति पटादौ कथं घटवदन्वयः इत्य
त आह। परंपरासंबंधेनेति। परंपरा च स्वप्रतियोगिकाभावसंबंधित्वमित्यर्थः। आहुरित्यानेन साक्षात्कारसंबंधेनैतु
ल्यमानान्ययोघटादेरभावेन सममनुपपन्नमिति सूचितः। स्वीयव्याख्यानेउपष्टंनमाह। सुकंचेति। अन्यथा अभावव
दलाक्षणिकत्वे। समानविभक्तिकयोरभेदबोधस्य व्युत्पत्तिसिद्धत्वेन नञो अभाववदलाक्षणिकत्वे च तदउपपत्तेरि २१
त्यर्थः। न च प्रकृतस्यार्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः कथं घटपदोत्तरविभक्तेनेऽर्थाभाववत्ताऽभेदान्वये समानविभ

क्तितयोपष्टंभवनिवार्यो। कर्मधारये विशेषणविभक्तेर्निरर्थकतया साधुत्वायैव प्रयुक्तेऽपि अभेदान्वये समानविभक्ति
कत्वं इत्यस्य विरुद्धविभक्तिराहित्यमेव अभेदबोधे तंत्रमित्यर्थः। घटपदोत्तरमविभक्तिश्च साधुत्वार्थिकेति भावः।
अन्यैवेति। न नामार्थयोर्भेदान्वयबोधप्रकारीभूतविभक्त्यर्थस्तंत्रमित्यादि निपाताव्ययातिरिक्त एवेत्यर्थः। अत एव नि
पाताव्ययस्थलेनादृशनियमाभावादेव इवार्थेति। अव्ययरूप इवार्थसादृश्ये चंद्रादीनां निरूपकतासंबंधेनान्व
य इत्यर्थः। तथा च निपाताव्ययातिरिक्तनामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वादिति भावः। ननु उपसर्ग इवादयो निरर्थका
एवं चंद्रपदं चंद्रसदृशपरं अत एव चंद्रपदमुखपदयोः समानविभक्तिकत्वापपद्यते अभेदान्वयबोधेन तस्य तेनान्वा
य चेद्रादिपदे लक्षणया अनवगमे तु इवादौ शक्तिभ्रमादन्वयः। धातोर्लक्षणानवगमदशायामिव उपसर्गेऽपि
तत्र यथा नपसर्गेपि शक्त्यापत्तेरुपसर्गेऽपि प्रपततेरुपत एवेति। निपाताव्ययेतादृशनियमाभावादेव घटो नास्तीत्यत्रापि ति।
अत्र अभावप्रतियोगितासंबंधेन घटस्य अन्वयात् निपाताव्ययातिरिक्तनामार्थ एव तादृशव्युत्पत्तिरिति भावः।
मानाभावादिति। निपाताव्ययातिरिक्तत्वविशेषणेन तादृशव्युत्पत्ति। अथ आख्यातवादः। यत्तु। तज्जादिदृशा

लकारसाधारणे। लत्वावच्छिन्नस्य यत्र आदेशस्तत्र निवार्ष्टिरिति नादित्वादिना एकवचनत्वादिभावः। वच्छि
न्नस्यैकत्वादौ लटत्वाद्यवच्छिन्नस्य वर्त्तमानवर्त्तमानत्वादौ शक्तिः। इत्थं च पचतीत्यादौ तिबाद्यादेशस्मारित
लडादेरेव यत्नादिप्रत्ययः। आदेशत्वादिकं च आदेश इति परिभाषाविषयत्वं बोध्यं। लडादेशयोरपि शक्तिर्देश
नयोः कर्त्तरि शक्तिरादेश्यर्थस्तु नेत्यत्र नेदाचयासेन वात्। इति। तत्र। इदमादेशादेशीभावसंबंधाधीनादेशी
स्मरतेनु तिबादिघुत्तर लत्वादिना यत्नानुभावकत्वकल्पने गौरवात्। वेदादिप्रयुक्तनि बादेरेवान्यतमत्वेन शक्तत्वो
चित्यात्। किं च तिबादिनामेकत्र शक्तिरन्यत्र लक्षणया शक्तित्रमाद्वा बोध इत्यस्तु। त्वया पि तिबादौ शक्तिश्च
मस्वीकारात्। तिबाद्यो लस्यादेशा वस्य वेत्यत्र मुनिवचनातिरिक्तप्रमाणं मादर्शनीयं। वचसावचस इत्या
दावनुभावकत्वेन क्लृप्तस्यादेशिनो देवेन देवस्येत्यादौ आदेशेन स्मरणं युक्तं तस्मात्प्रत्ने तेसरवाद्य वर्त्तमानत्वा २२
द्यनुभावकतावच्छेदकमित्यादिनैव यत्नानुभावकत्वं अनुभावकतायाः शक्ततायाश्चैकमवच्छेदकं। एतेन लाद
यः आदेशिनो निरर्थका एवेति वैयाकरणमतमपास्तं। आदेशित्वे मानाभावात्। लस्य कादेव विधानमत्र विनिगम

कानावाच्च साधुनेवप्रयुञ्जीतेति विधेरुपयोगित्वेन तु निर्व्याकरणस्य प्रामाण्यमिति पिरेत्तु। तिबाद्यवच्छिन्नस्य सं
केतन्नमादेव बोधः शक्ततावच्छेदकेन तस्य शक्यतानेन त्यात्त्व एतत्सर्वेत्र तन्यदान्यतमत्वस्यैव शक्ततावच्छेदकत्वादिति
ऊः ये तु एकाण्विपद यदत्वमेव शक्ततावच्छेदकमस्तु वा पदमात्रस्य चरमवर्णत्वमेव तथा। अन्यनुतात्पर्यग्राह
कसमुदायशक्तत्वव्यवहारस्तु समासादाविव गौण इति तत्रा तथा सति कल्यादिपदस्यासाधुत्वासंकोचे मानाभा
वादित्यर्थः। अतएव चेद्यदार्थमुख्यपदार्थयोरभेदान्वयवशादेधाहितायाश्चेदृयवमुख्यपदोत्तरं हितायेत्यर्थः। अ
भेदान्वये समानविभक्तिकत्वस्य तन्त्रत्वादिति भावः। अन्यथा तत्र अभेदबोधानंगीकारे तदनुपपत्तेः समानविभक्ति
कत्वानुपपत्तेरित्यर्थः। अभेदान्वयबोधमभ्युपेत्याह। अस्तु वेति। विभक्तौ चन्द्रलदोत्तरहितायां विभक्तौ। तथा चेन्द्रसंबं
धि साहरस्याश्रयेमुख्यमित्यन्वय इति भावः। अनुशासनेनेति। शेषेषष्ठीत्यनुशासनादित्यर्थः। तथा च प्रथमायाः प्र
पेक्षणा इत्यर्थः। तथा सतीति। भूतले घटपटत्वाभावस्य एकस्याविद्यमानत्वादित्यर्थः। अभावस्येति। घटत्वाभा
वस्य उभयघटसंबंधिनः एकस्य भूतलवृत्तित्वादित्यर्थः। तथा च घटाद्यभावे प्रत्ययाः अभूतसंख्या प्रतियोगिनि

घटादावेवान्वय इति न घटो नास्तीत्यन्वयः। न च प्रत्ययार्थीभूतसंख्यायाः कथमभावेऽन्वय इति प्राचीनः शंक
ते। कथं तर्हि। तमेतिराशंसा समाधत्ते। भावनान्वयीति। घटो नास्तीत्यादौ आख्यातार्थास्तित्वान्वयिनि प्रतियो
गिनि घटे संख्यान्वय इत्यर्थः। अत एव यत्र भावनाऽन्वेति तत्रैव तिङर्थ इति नियमः उपपद्यते। पुनः शंकते प्र
तियोगिनि कथं संख्यान्वयो नाभावे इत्याह। कथमितीति। नत्वेवेति। इच्छाधीनत्वानुरोधात्। भावनान्वय इ
ति। अभावप्रतियोगिनि संख्यान्वय इति भावः। इहेति। भूतले घटो नास्तीति वाक्यार्थः तत्प्रतीयते इत्यत्रान्वयि
नि चैव इत्यत्रैवं तत्र तथा च यत्राख्यातत्र आख्यातार्थभावान्वयो न त्वर्थे तथा प्रचापीत्यर्थः। तान इति। एवं चाख्या
तार्थभावनान्वयिन्येव घटादौ संख्यान्वय इति न त्वेवं जातिसत्ता नास्तीत्यत्र जातिवृत्तित्वाभाववति सत्तेत्यन्वयो ध्ये
याः। स च न संभवति जातिवृत्तित्वस्य सामानाधिकरण्येन सत्तायां सत्त्वात् जातिसमवेतत्वे चाप्रसिद्धेर्निषेद्धु २३
मशक्यत्वात्। इत्याह। नन्विति यागतिरिति। तथा चात्रैवत्रापि शाब्दबोधोपपत्तिरित्यर्थः। अयोग्यमेवेति इष्टं चे
योग्यं वह्निना सिंचतीति वाक्ये यथा स्वर्कं तथा जातौ न सत्तेत्यपि इत्यर्थः। ननु एतस्माद्वाक्यादन्वयोऽनुभूयत एवे

त्यत आह। वृत्तिमदिति। तुल्यमिति तथा च जातौ न सत्तेत्यत्रापि साक्षात्संबंधावच्छिन्नवृत्तित्वस्याभावो बोधाभाव
वगाहते न तु समवायसंबंधेन वृत्तित्वस्य इत्यस्यापि वक्तुं शक्यत्वादित्यर्थः। तथापीति। निषेधः भूतले घटो नास्ती
त्यादौ आख्यातार्थास्तित्वनिषेध इत्यर्थः। नामार्थयोरन्वयस्याव्युत्पन्नत्वादिति भावः। निपातातिरिक्तेति। तथा
च निपातातिरिक्तनामार्थयोरभेदेनान्वय इत्यर्थः। शंकते स्यादेतदिति। नियामकसमभिव्याहारो नियामक इत्य
र्थः। कश्चिदुत्तरयति। अधिकरणेति। आहेति पदेनास्वरसः सूचितः। स च नपचतीत्यादिन्यस्तत्वयमेव स्फुटीकरिष्यति।
प्रतियोग्यनुयोगिपदयोः तद्वाचकपदयोरित्यर्थः। समानविभक्तिकेति। तन्त्रमिति। सर्वान्वय उत्तरं कस्यचिद्दूषयति।
नपचति चैत्र इति। अन्योन्याभावबुध्यत्वात्तिमुत्काह दूषयति। अनन्विति। सिद्धान्तयति निच विनिर्मोक इति। नञ्समभि
व्याहार इत्यर्थः। तत्रेति। समभिव्याहृतनय इति शेषः। अन्यत्र नञ्समभिव्याहृतप्रतियोग्यनुयोगिबाधकपदयो
रभेदातिरिक्तसंबंधेन तदन्वयस्तत्र नञ्समभिव्याहारेत्यर्थः। अन्यबोधकत्वं सत्यंताभावबोधकत्वं अत्यंताभाव
बोधकत्वं इत्यर्थः। शनिबुध्यतिः इत्याकांक्षेत्यर्थः। अत एव यद्भावप्रतियोग्यन्वये या बिनञ्निरपेक्षते नञातत्रान

वान्वयेपिसाविनक्तिसपक्षेनेइतिइतिसिद्धांतार्थेनेणप्रतियोग्यभावान्वयोनुलयोगक्षेमाविति।शेषितिसंतोवदेवि।
इमाव्युत्पत्तिमनुभवेनदृढयति।अस्तिचेति।नमआसत्त्येनओऽसमभिव्याहारइत्यर्थः।अनस्तचेति।समभिव्याहृतपद
इतिशेषः।अनेदान्वयेति।किंतुआधाराधेयभावेनान्वयेआकांक्षेत्यर्थः।नचेति।समभिव्याहृतनद्यइतिशेषः।सं
क्षेपइति।अत्रेदमवधेयं।तात्पर्यवशात्क्वचित्कूतलादौघंटात्वंतानावः।घटःचित्घटादौवृत्तित्वाभावप्रती
यते।अतएवपृथिव्यांगंधोनजलेइत्यादौप्रतीतेरेकेविशेष्यत्वानुभवःसर्वसिद्धइतिदिक्।आसत्तिकारिकमंतेइम
यति।व्यंजनाचेति।वृत्त्यंतरंशक्तिलक्षणातोभिन्नमित्यर्थः।हेतुमाह।लक्षणेवेति।नदर्थसिद्धेः।व्यंजनाप्रतिपाद्य
नीतरित्यर्थः।अयरांकते।नन्विति।सामुख्यार्थान्वयानुपपत्तिसर्वत्रास्ति।तथाचक्वचिदस्ति।ननुलक्षणावत्सर्व
त्रेतिभावः।ननुव्यंजनायांक्वचिदेवान्वयानुपपत्तिर्नसर्वत्रेतिअतइत्यतआह।गच्छगच्छतीति।तदभावात्मु २४
ख्यार्थेगमनान्वयानुपपत्त्यभावात्।वृत्त्यंतरंव्यंजनारूपमित्यर्थः।लक्षणाबीजत्वंमुख्यार्थान्वयानुपपत्तिप्रतिसंधा
नस्यतिशेषः।गंगानीरयोःसंबंधस्यशक्यसंबंधरूपलक्षणाबीजत्वंननुमुख्यान्वयादितिभावः।नापितत्पान्वयेति।

लक्षणायांतात्पर्यग्राहकंयत्लक्षणाबीजंवत्मुख्यान्वयानुपपत्तिज्ञानस्येत्यर्थः।तात्पर्यव्याप्यांतरतोपीति।
प्रकरणादिनापिकदाचित्तात्पर्यग्राहादित्यर्थः।तथाचमुख्यार्थान्वयानुपपत्तिज्ञानस्यनलक्षणायांतात्पर्यग्रा
हकत्वंव्यभिचारादितिभावः।ननुलक्षणाबीजत्वं।अस्तिचमुख्यार्थान्वयानुपपत्तिज्ञानादेवलक्षणाजन्यपदार्थो
पस्थित्यालाक्षणिकपदात्शाब्दबोधइतिसर्वमवदातं।व्यभिचारादितियष्टिप्रवेश्यानुपपत्तिज्ञानविरहेवनव्य
भिचारादित्यर्थः।नहियष्टिप्रवेशमनुपपन्नमितियष्टिधवेऽत्रलक्षणाइतिध्येयो।तात्पर्यविषयेति।तथाचपदतात्पर्य
विषयान्वयानुपपत्तिज्ञानजन्यशाब्दमितिनियमः।तद्यथायष्टीःप्रवेशयेत्यत्रापस्तीतिसमुदायार्थःतद्धीतितात्पर्य
नुपपत्तिः।पदतात्पर्यानुपपत्तिरित्यर्थः।तथाचपदतात्पर्यानुपपत्तिज्ञानंलक्षणाजन्यशाब्दबोधकपदस्यसहकारी
तिनियमइत्यर्थः।साचापदतात्पर्यानुपपत्तिधीश्चइहापिव्यंजनाम्लेपीत्यर्थः।तथाचगच्छगच्छसीत्यादावपिगम
नबोधकपदस्यगमनाभावतात्पर्यकत्वान्वयानुपपत्तिज्ञानादेवलाक्षणिकादेवगमनबोधयदात्गमनाभावबो
धोनिर्वहतितल्लव्यंजनमेवेतिभावः।पुनर्वादीशंकतेतस्यादेतदितिलक्षणाप्रयोजनंगंगापदस्यगंगाती।

रेल्लक्षणाप्रयोजनइत्यर्थः॥ प्रयोजनंफलमित्यर्थः॥ लक्षणासाध्येत्यर्थः॥ तथाचतत्प्रतीत्यर्थंव्यंजनाकाक्षांकाप्र
तिरिक्ताद्वृत्तिर्वास्थायेत्यर्थः॥ प्रयोजनाभावात्॥ तथाचप्रयोजनयथागंगेगापदलक्षणायाघोषप्रतीतिवद्व
यस्तथापिशैत्यपावनत्वाद्यावपिगंगापदलक्षणायाः प्रयोजनेतिव्यंजनंनैवतद्वयस्थापिकावाच्येतिभावः॥ लक्ष
प्रतीतेरेवविशैत्यपावनत्वादिप्रतीतेरेवप्रयोजनत्वात् इत्यर्थः॥ ननुगंगापदलक्षणायालक्षतीरप्रतीत्यति
रिक्तशैत्यपावनत्वादिप्रतीतिप्रयोजनतयागंगापदस्यशैत्यपावनत्वात् इत्यर्थः। दिलक्षणायाअपिलक्षणैवशैत्य
पावनत्वादिप्रतीत्यतिरिक्तप्रयोजनाभावात् कथंशैत्यपावनत्वादौलक्षणेत्याह॥ तथापीति॥ तथाचलक्ष्यप्रतीत्य
तिरिक्तप्रयोजनयतिलक्षणेतिनियमात् नशैत्यपावनत्वादौलक्षणासंभवतीतिभावः॥ नत्विति॥ गौरवा
त् प्रयोजनवत्वमेवलक्षणायांबीजंनतुलक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्वमित्यर्थः॥ व्यंजनावादिशंकते २५
स्यादेतदितिनानार्थेति अर्थविशेषप्रत्ययेतात्पर्यविषयइत्यर्थः॥ प्रकरणादिति॥ तथाचसैंधवादिनाना
र्थकपदस्यशक्यविशेषेपिअश्वलवणाद्येकस्यैवयत्प्रत्यायकत्वंतत्प्रकरणादिकमेवसहकार्येनिया

मकमित्यर्थः॥ तत्रनाभिधेति॥ इत्थंचतत्रसहकार्यभावात् नशक्याबोधः किंतुविजनयैवेतिभावः॥ ननुतत्रल
क्षणयैवतत्त्वबोधोभविष्यतीअत्नव्यंजनयेतत्रआहनापिलक्षणेति॥ मूलमितिपूर्वोक्तयाअन्वयेणादिति॥ लक्ष
णायाः अयोगादित्यर्थः॥ सहकारीत्विति॥ तथाचअभिधाजन्यशाब्दत्वावच्छिन्नप्रतिप्रकरणादीनामनुगमेनव्य
भिचारात् कारणत्वासंभवइत्यर्थः॥ तात्पर्यग्राहकत्वेनेति॥ तात्पर्यग्राहकत्वेनप्रकरणादीनांकारणत्वमिति॥
तात्पर्यानुपपत्तिः पदतात्पर्यानुपपत्तिरित्यर्थः॥ तथाचपदतात्पर्यानुपपत्तिर्नलक्षणाजन्यबोधकपदगमना
भावोनिर्वहतीति अलंविजलया तथाचक्वचित्पदेयदेकंसहकारीतिनियमइत्यर्थः॥ साचापदतात्पर्यानुप
पत्तिर्धीश्च इहापिव्यंजनास्थलेपीत्यर्थः॥ तथाचगच्छसीत्यादावपिगमनबोधकपदगमनाभावानिर्वहतीति
अलंविजलया तथाचक्वचित्पदेयदेकदेशोवाक्वचिद्वाक्यवचनाविशेषेणगीविशेषेआश्रिता इतितथावा
श्यनेदादेवलक्षणाव्यंजनयोर्भेदइतिभावः॥ असिद्धेः पदैकदेशन्यायादौव्यंजनायाः असिद्धेरित्यर्थः॥ ननु
तत्प्रतिपादकाः॥ ननुअर्थविशेषप्रत्यायकत्वव्यंजनाख्यावृत्तिमतइत्यर्थः॥ आश्रयभेदाभावात्॥ व्यंजनाना

पराहतिः। किंतु तत्प्रतिपादकाः न तु अर्थविशेषप्रत्यैतत्र लक्ष्ययैव अनिमतर्थबोधनिर्वाहः एवं च यदेकदेशो दे
अनिमतार्थतात्पर्यं ज्ञाप्यते न तु व्यंजनेइति भावः। तात्पर्यज्ञानं नियत तात्पर्यज्ञानमित्यर्थः। लक्षणासहका
री। लक्षणाजन्यशाब्दबोधजनकं नियतः नियततया सहकारी मुख्यरचितेति प्राक्तनसंस्कारादिना वा लक्ष्यरचिते
त्यर्थः। व्यंग्य इति। नवाभिमतं व्यंग इत्यर्थः। ननु केशवालुकादिकमिति। तथा च शैत्यपावनत्वादौ विवगंगासंबं
धस्याभाव विशेषात् तात्पर्यज्ञानाभाव एव केशवालुकाघनाः न नियामक इति भावः। वासनाविशेष तथा च
वासनाविशेषैर्गेव पदार्थविशेषायास्थितो यदार्थविशेषज्ञाननियम इति भावः। स एव। वासनाविशेष एव।
लतिव्यंग्य इत्यर्थः। वस्तुत इत्यादि। अस्याभिप्रायः नीयते अनुमीयते तथा च वक्त्रीणां स्त्रीणां तात्पर्यं श्रोता नानुमीयते
इत्यर्थः। सेनाव्यतेउ चुकोटिकसंदेह विषयीक्रियत इत्यर्थः। निर्णीयते शाब्दबोधो भवतीति अर्थः। लतेव्यंज २६
नयाव्यर्थ इत्यर्थः। उपसर्गशक्तिघातादिनां मतं दूषयितुं आह। स्यादेतदिति। उपसर्गौ द्योशक्तिरितुपपन्न लक्षणा ल
क्षणा वेत्यपि दृष्टव्यं। कचित् न लक्षणा अशक्तत्वादिति पाठः। समीचीनः द्योतकत्वात् उपसर्गाणामिति शेषः। द्योतकत्वं

च उपसर्गसमभिव्याहारस्यार्थविशेषे तात्पर्यग्राहकतयेति मंतव्यं। प्रकृष्टजयलक्षक इति। तथा च प्रथमतो जयेशक्
तिः प्रकृष्टजये लक्षणेति मंतव्यं। अशाब्दस्त्विति। तात्पर्यग्राहकः। अर्थविशेषे वक्तुतात्पर्ये ज्ञायकत्वमेव चेति। तात्पर्य
ग्राहकत्वमेवेत्यर्थः। न चेति। तथा च प्रकर्षेलक्षणा न तु प्रकृष्टजय इत्यर्थः। जयमात्रं शक्यं जयत्वं शक्यतावच्छेदक
मित्यर्थः। ननु विशिष्टजयत्वं शक्यतावच्छेदकमित्यर्थः। तथा च प्रकर्षप्रकारक उक्तयबोधो लक्षणया न तु प्रकर्षबोधश
क्यानियतसंबंधाभावात्। प्रकर्षजयत्वस्य शक्यतावच्छेदकत्वे तु तस्यादिति भावः। विशिष्टजयलक्षत्वे प्राचां संमति
माह। तदाहुरिति। अन्येन रूपेण। शक्यतानवच्छेदकरूपेण। ज्ञातेन शक्यसंबंधिनीत्यर्थः। तथा च लक्षणाजन्यबोधे श
क्यार्थविषयितानियत्वनियमात् जि। धातोर्नाकेवलं प्रकर्षो लक्ष्य इति वक्तुं शक्यत इति ध्येयं। ननु प्राद्युपसर्गस्य कथं
न प्रकर्षे शक्तिरित्याशंकते। न चेति। अन्यलभ्यत्वादिति। तथा च अनन्यलभ्यस्यैव शब्दार्थत्वात्। धातोरेव तादृशार्थ
लाभे किं प्राद्युपसर्गस्य कथं तत्र शक्तिकल्पनयेति न तु पपत्तीति इत्यादौ विद्यातीत्यादुपसर्गं विना केन्यार्थप्रत्यायकः
न तु लोपे न अस इत्यादि धातोरभावात् कथमत्र व्यत्यादि रूपार्थप्रत्यय इत्यत आह। ब्रवीत इति। लुप्तो अस्तु रेवेत्य

प्रसक्तिः सन्निति शेषः। ननु धातुलोपमजानतो धातुः स्मरणाभावेन तत्रोपसर्गस्यैवार्थप्रत्यायकत्वमनायत्यात्वमावा
च्यमत आह। धातुलोपमजानत इति तथा च तादृशस्खलेशाद्बोधोपपन्नपनीय इति भावः। संक्षेप इति अत्र केचित्
जीधातोरेव प्रकृष्टजयेल्लक्षणायेच्छयाध्यस्तु नानेकार्थत्वेन जीधातोर्जयवत्प्रकर्षोप्यर्थोस्तु। एकपदोपस्थाप
ययोः सति वर्तमानत्वयोरिव जीधात्वर्थस्थितयोरपि प्रकर्षजययोः परस्परान्वयोस्तु लाघवादिति वदन्ति। नन्वेवं। अन्न
नामनेकार्थत्वात्सर्वधातोरेव सर्वार्थकत्वसिद्धेः तेन लक्षणायाः शक्तेः तदर्थोपस्थितिसंभवान्नायदि च व्याकरण
केशान्निर्युक्तकसार्थकत्वमेव धातूनां नानार्थकत्वं इति विनाव्यसेन तत्र तु जीधातोः प्रकर्षार्थकत्वं कुत्राप्ययुक्तमिति चेत्
अयोपसर्गस्य प्रादेरेव प्रकर्षशक्तिरस्तीति चेन्न। एवं सत्याख्यातार्थजावनान्वयो न स्यात्। प्रकृत्यर्थान्वितस्यार्थ
बोधकत्वं प्रत्ययानामिति व्युत्पत्तेः। न च उद्दनं पचतीत्यत्र उद्दनविषयकपाकान्वयवत्। प्रकर्षादिविशिष्टधात्व २९
र्थे तदन्वयः स्यादिति वाच्यं। लाघवात् उपसर्गाणां शक्त्यनुवादकत्वं न तु शक्तत्व इत्योपसंहारिकौ शक्तिरेव धात
त्वे एवं च विशेष्यशक्तिर्जीधातोर्विशेषणप्रकर्षविषयत्वमात्रं कल्प्यते न तु उपसर्गस्य तत्र शक्तिकल्पनं गौरवात्

पिसंबंधत्वा —
दन्यत्वेन पद्यविते ना आख्यातस्येति। आख्यातस्य यत्नो वाच्य इत्यत्रादिय तत्त्वावच्छेदेन वाच्यत्वान्वयात् अन्विताव
च्छेदकस्य यत्नत्वस्य प्रकृते स्वरूपसंबंधरूपवाच्यतावच्छेदकत्वाभावः। तेन व्यापारशक्त्यादिनापि यत्र वाच्यतायाग
मावन सिद्धसाधनावकाशः। अत्र आख्यातत्वं संकेतविशेषसंबंधेनाख्यातपदवत्त्वं। एतेन विभक्त्यादयो व्या
ख्याताः। तिबाद्यन्यतमत्वं वा तत्त्वं इदं च साधनकोटिनिविष्टं न तु शक्ततावच्छेदकं विनापि तेन रूपेण ज्ञानं तिस्त्यादिना
ज्ञानादेव तिबादितोर्थप्रत्ययेनन्तिप्रादेरेव तथात्वात्। आश्रयाव्यवधानसंबंधेन आख्यातवत्त्वं ख्यत्वं वत्त्वथा
दिकं कमतौ स्थैव मेवाग्धुज्ञारितपदे नेदृषि नाख्यातपदत्वान्न तु गमइति ध्येयं यत्न एवेति यत्नत्वं शक्ततावच्छेदक
त्वं इत्यर्थः। भजनयत्न इत्यनेन यत्नार्थकत्वं सुव्यक्तमेव भज इत्यत्रिप्रत्याह। पचतीत्यस्येति। ननु विवरणान्न कथं
शक्तिग्रहः। अत आह व्यवहारेति। विषयतावच्छेदकधर्ममादायैवान्तरविश्रामात्। किं करोतीति प्रश्नोत्तरस्य पच
तीत्यत्राख्यातस्य यत्नार्थकत्वं विना अनुपपत्तेश्च। अत एव किं द्वयमित्युक्ते गुणादित्युत्तरं तं द्रव्यमेव प्रतीयते तेन
च वरयोगच्छतीत्यादेर्विवरणानुगमनानुकूलव्यापार एव प्रतीयत इति तत्रापि शक्तिः स्यादिति चेन्न। असति

बाधकेविवरणादिकशक्तिग्राहकमंडनेयत्रापेक्षयागौरवस्यैवबाधकस्यव्यापारेसत्त्वादितिभावः।नन्वेवंर
थोगच्छतीत्यादौ।आख्यातार्थयत्नोनप्रतीयतइतिकथमाख्यातवाच्यत्वंयत्नस्येत्यतआह।तथाचेति।नमुख्यार्थ
नशक्यार्थइत्यर्थः।मुख्यार्थाबाधाविषयत्वेहेतुमाह।रथादीनामिति।नापीति।अन्यथा।विभक्तौलक्षणांगीकारेव्य
त्ययानुशासनेति।कर्मणिषष्ठीत्यनुशासनवैयर्थ्यात्।विनैवव्यत्ययानुशासनेनविभक्तेषष्ठ्यालक्षणयैवकर्मत्व
बोधसंभवात्इत्यर्थः।।सिद्धंइत्यंतेन।सिद्धंव्यंजनयेत्यर्थः।व्यत्ययानुशासनाबलादितिविभक्त्यर्थेव्यत्ययानु
शासितेविभक्तेर्लक्षणानतुव्यत्ययानुशासितान्यविभक्त्यर्थेविभक्तेर्लक्षणेतिवाक्यार्थः।अन्यत्रापि।व्यत्ययानु
शासितातिरिक्तविभक्त्यर्थेपीत्यर्थः।नलक्षणेति।पूर्वान्वयितयाचव्यत्ययानुशासितविभक्त्यर्थेविभक्त्यर्थोतिरि
क्तेश्चलक्षणायांबाधकाभावादितिभावः।इहरथोगच्छतीत्यादौकिंत्विति।व्यापारस्यापिविभक्त्यर्थत्वाभावात्
विभक्त्यर्थेपिक्वचित्लक्षणास्थलंदर्शयति।दृश्यतेचेति।कर्मत्वेलक्षणेतिशेषः।अतएवग्रामस्यगंतेत्यादौग्रा २८
मकर्मकगमनान्वयबोधः।ननुसंबंधेषष्ठीत्यनुशासनात्संबंधेषष्ठ्याःशक्तिरित्युक्तमभिहितैः।तथाचकर्मत्वस्या

पिसंबंधत्वानुशक्तेरेवतत्रषष्ठ्याःइतिव्यत्ययानुशासनेनतत्रकर्मलक्षणेत्याशंकते।नचकर्मत्वमपीति।कर्म
त्वप्रकारकेति।तथाचषष्ठ्याःशक्यतावच्छेदकसंबंधत्वप्रकारकबोधःशक्त्यैवजन्यतेइहतुकर्मत्वस्यसंबंध
त्वेपिशक्यतानवच्छेदककर्मत्वत्वप्रकारकानुभूयमानबोधोलक्षणयैवेत्यर्थः।तया।विना।लक्षणांविनाथवा
नावच्छेदकप्रकारकबोधोलक्षणयैवजन्यतइतिभावः।तत्प्रकारकेति।कर्मत्वप्रकारकेत्यर्थः।अनुशासनेति
व्यत्ययानुशासनेत्यर्थः।व्यत्ययानुशासनंहिविभक्तेर्लक्षणाविधायकं।नतुशक्यतानवच्छेदककर्मत्वप्रकार
कबोधस्यालीकत्वेनसंभवतीतिभावः।द्वितीयायाइति।असाधुत्वं।व्याकरणनिष्पन्नत्वंकर्तृकर्मणोःसतिनि
त्यमितिव्यत्ययानुशासनस्यतत्प्रत्यययोगेकर्तरिकर्मणि।प्रतीयमानेषष्ठ्याएवसाधुत्वेनद्वितीयादिविभक्ते
रितिभावः।निष्ठादिवर्जनमिति।तद्योगेकर्तरिकर्मणिचप्रतीयमानेकर्तृकर्मणोःकृतिनित्यंइतिव्यत्ययानुशा
सनेनषष्ठ्याःसाधुत्वमात्रंप्रत्याय्यतेतत्रनकर्मत्वप्रकारकबोधः।एवंचषष्ठ्यानिरर्थकत्वेनिष्ठादितद्योगेपि
कर्मत्वत्वप्रकारकबोधविधायषष्ठ्याःनिषेधवैयर्थ्यात्षष्ठ्याःनिरर्थकत्वेनविरुद्धार्थान्वयतोप्रतीतेर्नुनिषे

धातुपपत्तेरित्यर्थः। नत्रेपि। निष्ठादित्तियोगइतिसूत्रार्थः। तत्‌निष्ठादिवित्यनुशासनमित्यर्थः। एवंचअन्नंपचंइत्यवप्रयो
गोननुअन्नस्यपचकमितिभावः। लघोगइतितव्यानीयल्यपुष्यनजाःकृत्याःएतत्‌इतिसघोगेषष्ठ्याःविकल्पविधा
यकानुशासनानुषष्टीतृतीयापिकदाचिद्विधियते। अतएवदेवदत्तेनकत्तव्यःकटःदेवदत्तस्यकर्त्तव्यःकटइ
तिप्रयोगः। एवंचनिष्ठादिष्वित्यनुशासनंनचेत्‌षष्ठीनिषेधकंकिंतुद्वितीयादिविभक्तेःसाधुत्वज्ञापकं। नदनिषे
धकाभावात्‌। तत्रैवषष्ठीवत्‌तृतीयापिभविष्यतिकिंविकल्पेनत्वतिमाविधायकानुशासनेनत्यर्थः। पाक्षिक
षष्ठ्यर्थमिति। तृतीयायाःअनिषेधेनैवतृतीयोपपत्तावपिपाक्षिकषष्ठ्यर्थंकृत्यानांकर्त्तरिचेतिविकल्पानुविधा
यिकानुशासनमित्यर्थः। अन्यथासर्वदाषष्ठ्येवस्यात्‌निषेधकाभावात्‌। अतएवचकृत्स्नेनकृतंकृत्स्नस्यकृतं
इतिप्रयोगः। संबंधत्वप्रकारकेति। कर्मत्वकरणत्वादिबोधोपिषष्ठ्याजन्यतेकिंतुसंबंधत्वेनशक्यतावच्छेदक २६
त्वेनरूपेणनतुकर्मत्वत्वकरणत्वत्वादिनेत्यर्थः। शेषवचनादिति। शेषेषष्टीत्यनुशासनस्यशेषत्वत्वादिसं
बंधातिरिक्तकरणत्वादिसंबंधेत्यर्थः। निष्ठादियोगइति। शेषेषष्ठ्याअसाधुत्वज्ञापकेविकल्पविधायकमनुशा

सनमित्यर्थः। तद्योगेपीति। निष्ठायोगेपीत्यर्थः। ताहृश्याःशेषषष्ठ्याः। अतएवदेवदत्तस्यकृतेइत्यादयोप्रयोगाःप
दिषष्ठ्याःकर्मत्वत्वादिप्रकारकबोधोत्पादकत्वानानुनवसिद्धः। इत्युच्यतेतदातस्यतद्वर्जनइतिन्यायेनाह
किंचेति। नाविनंघटंजानातीतिविषयतायांलक्षणेतिपूर्वान्वयिक्रियाजन्यफलशालित्वरूपेणसुधीति। अत्र
ग्रंथकेन। द्वितीयार्थः। द्वितीयशक्यार्थइत्यर्थः। अत्रहेतुमाह। क्रियाजन्येति। तथाचविनक्तौलक्षणेतिसाधुत्वमि
तिभावः। समाधत्तेनहीति। उतइति। क्रियाजन्यफलशालित्वरूपकर्मत्वस्यापीत्यत्रगौरवात्‌कथंशक्यताप्रतीति
रपितुलक्षणयेतिभावः। नत्रापिघटंजानातीत्यादावपिवृत्त्यंतरंलक्षणेतिनियमः। तेनविघतेव्योमघटोतिघ
तिइत्युणानिश्चायकत्विरित्यर्थः। विनक्तौलक्षणाभावादितिभावः। वस्तुतोसुपूविनक्तौनलक्षणंनतुतिबादिसा
धारणविनक्तौनलक्षणेतिनियमः। तेनविघतेव्योमघटोतिघतिइत्यादिप्रयोगाइतितत्वं…नवृत्त्यैवेतिल
क्षणैवेत्यर्थः। मीमांसकास्त्विति। अनुकूलव्यापारत्वंशक्यतावच्छेदकंतत्स्वरूपसंबंधविशेषोआख्यातापा
धिर्वेति। मुख्यःप्रयोगःभाष्यप्रयोगइत्यर्थः। कथमितिअनुकूलत्वस्याशक्यत्वेइत्यर्थः। संसर्गविधयेतिसं

सर्गस्याशक्यस्यापि ज्ञानात् इतिन्यायः॥शकुनेत(?)हीति॥नहीति॥यत्नस्येति॥साध्यत्वेन तु ज्ञानानुकूलत्वे प्रयत्नस्य
त्स्यैव ज्ञानासमवायिकारणमनःसंयोगस्य मनोक्रियाजन्यत्वात् सा च क्रिया प्रयत्नवदात्मसंयोगजन्येत्यतआ
श्रुणीयते चेति॥तथा च ज्ञानातीत्यादौ ज्ञानाद्याश्रयत्वमेवानुभूयते न तु ज्ञानानुकूलयत्नोपीत्यर्थः॥समाधत्ते आश्र
यतालक्षणत्वादिति॥अनुकूलव्यापारइव आश्रयताया लक्षणेत्यर्थः॥धात्वर्थएवेति॥ज्ञानमित्यर्थः॥साक्षात्॥आश्र
याश्रयिभावसंबंधेन संख्यानन्वयेऽन्वेतीत्यर्थः॥अत्रकलो(?)धात्वर्थो संख्या चैकत्वादि चैत्रेन्वेतीति ध्येयं॥न तु यत्नोपि
यत्नेन्वेतीति प्राकृतेनेन संबंधः॥अप्रयोग्यत्वात्॥बाधितत्वात्॥साक्षादिति॥विनत्यर्थमद्वारीकृतेत्यर्थः॥नामार्थधात्व
र्थान्वयता॥विशेष्यकशाब्दप्रति प्रकारतया विनत्यर्थेपि स्थिति॥कारणप्रतियावत् अन्यथा विनत्यर्थमद्वारीकृत्यापि
नामार्थधात्वर्थयोर्भेदेनान्वयस्वीकारो न तु अघट अगमनं चेद् इव मुखमित्यादौ नामार्थधात्वर्थयोर्नामार्थ ३०
योश्च॥भेदेनान्वयदर्शनात् निपातातिरिक्तत्ववत्सविषयकधात्वतिरिक्तेत्यपि व्युत्पत्तौ नीयमत आह॥वस्तुतइ
ति॥आख्यातार्थविशेष्येति॥स्तति(?)विशेष्येत्यर्थः॥अतएव॥पचतीत्यादौ पाकानुकूलकृतिमान् एकश्चैत्र इति बोधः॥

न चाख्यातार्थविशेष्ये एकत्वादिसंख्यान्वयस्तदा वर्तमानत्वविशेष्योपि कश्चित् स्यात्तो जानातीत्यादौ च धात्व
र्थे संख्यान्वयस्यादित्यत आह॥विनत्यर्थविशेषणीकृतेति॥नामार्थधात्वर्थयोर्निरासः॥आख्यातार्थविशेष्य आ
ख्यातार्थविशेष्ये संख्यान्वय इति नियमपरिग्रहितो आख्यातार्थविशेष्य इत्यर्थः॥विनात्यर्थविशेषणीकृतेतु
क्तिफलमाह॥नत्वोद्रनार्थ(?)इति॥द्वितीयार्थविशेषणत्वात्॥द्वितीयार्थकर्मत्वस्य तत्र तस्य विशेषणत्वादित्यर्थः॥
पच्यत इत्यत्रेति॥कर्माख्यातार्थविशेष्य इति पूर्वान्वयीन कर्ता आख्यातार्थविशेष्य इत्यत्रान्वेति॥अत्र हेतुमा
ह॥तृतीयेति॥तृतीयार्थान्वितत्वेन निराकांक्षत्वादित्यर्थः॥तथा च चैत्रेण पच्यते तंडुल इति कर्माख्यातस्थले क
र्मत्वमाख्यातशक्यं॥तच्च पाकजन्यफलरूपं॥तच्च प्रकारतया॥तंडुलेऽन्वेति॥आख्यातार्थसामान्यस्य किंचिन्न्यना
धनायाश्च चैत्रत्वादौ अन्वयः॥तृतीया चाधेयत्वार्थिका॥एवं च चैत्रनिष्ठकृतिविषयपाकजन्यफलशालिंतं
डुलइति बोधः॥येयं भावनान्वेति ते तं संख्यापीति यन्निमस्तु आख्यातार्थविशेष्य एव नामार्थे संख्यान्वयपर
तया के स्तत्र च आख्यातार्थविशेष्यनामार्थ एवेत्यस्य फलमाह॥स्थीयत इति॥तथा चात्र आख्यातार्थप्रकार

बोधनाबाधात् संख्यानन्वितेत्यर्थः। एवं स्वप्यत इत्यत्रापि द्रष्टव्यं। अत एव ईदृशं कर्मकाभावाख्यातस्थले संख्या
याः अन्वयादेवा सार्थकमिति। स्वापस्य चित्वबुद्धत्वेपि संख्यायाः अन्वयानुसाधुत्वार्थं प्रथमोपस्थितत्वादेक
वचनं कल्प्यत इत्यर्थः। नन्वेवं सति कर्तृकाख्यातादिस्थले संख्यान्वयाद् बोधस्तन्नामार्थविशेष्यकधात्वर्थप्रका
रकबोधे भवति। तत्रैव च संख्यान्वयः स्यान्नतः इह तु संख्याया अन्वये भावाख्यातस्थले किं विशेष्यकान्वबोधः।
इत्यत आह। धात्वर्थेति। तथा च देवदत्तनिष्ठास्थितिरिति बोधः। असाधुत्वादिति। देवदत्ताभ्यां देवदत्तैः
स्थीयत इत्यत्र बहुवचनमसाधुत्वादित्यर्थः। ननु तथा आख्यातार्थसंख्यायाः अन्वयो व्यवस्थापितो भा
वनाविशेष्य एव तथा आख्यातार्थकालः कुत्रान्वेतीत्याशंकते। स्यादेतदिति। समाधत्ते एकपदोपात्तेति। त
था च पाकानुकूलवर्त्तमानकृतिमांश्चैत्र इति बोधः। धात्वर्थ इति। एवं पचतीत्यादौ वर्त्तमानकालादेः
पाकादावन्वयात् वर्त्तमानपाकानुकूलकृतिरिति बोध इत्यर्थः। परेषूक्तं परिहरति। कथमन्वयेति। भविष्यता ३१
तीतेति। आख्यातविशेषैः श्रुताविशद्धिकः। भविष्यत्वेचेति। कालविशेषणरूपेचेत्यर्थः। एतेन भविष्यत्वेन च वर्त्तमान

प्रागभावप्रतियोगित्वमुत्पत्तिमत्त्वमिति ध्वनितं। अघ भविष्यतीति प्रत्ययोपि अघविनष्टेति प्रागभावप्र
तियोगित्वस्य उत्पन्नो सत्वादिति परास्तं। तत्र ध्वंसउत्पत्तिः प्रत्याख्याते प्रत्यये न चाश्रयत्वं वर्त्तमानप्रागभा
वप्रतियोगित्वं लक्षणेन भविष्यत्वं च प्रत्याख्याते तत्र धात्वर्थ एवान्वेति। धात्वर्थश्च आश्रयत्वं चेति धात्वर्थ एव
देशकालविशेषाद्देवरप्यन्वयः। एवं च इहाघ घटो भविष्यतीत्यादौ एतद्देशाद्यकालाभिकरणकावर्त्तमान
प्रागभावप्रतियोगिना पाउत्पत्तिस्तदाश्रयो घट इति बोधः। एवं च ध्वंसाविना नाघ भविष्यतीति प्रयोगः साधे
ति। तथा च आख्यातार्थस्तामान्यत्वेनावे वर्त्तमानप्रागभावप्रतियोगिरूपभविष्यत्वस्यान्वय इत्यर्थः। एवं
वर्त्तमानप्रागभावप्रतियोगिनी पाकविषयिणी यान्निस्तद्वान् चैत्र पक्ष्यतीति बोधः। सोपि पचति चैत्रे प्रत्यस
ति प्रागभावमादाय स्यादिति भावः। अघघ्नति प्रागभावस्येति। तथा च तद्वृत्तिविशेषप्रागभावप्रतियोगित्वेष्टं
सप्रतियोगित्वे च वक्तुस्तात्पर्यविषये भविष्यतीतिनात्वमित्यर्थः। व्यापारविशेष्यकर्तृत्वमिति। देवदत्तनिष्ठावि
लत्यनुकूलतस्तुरूपफलेपाग्निविषयकप्रत्नवानिति बोधः। कल इति। फलस्येतद्धितायार्थत्वादिति भावः।

धात्वर्थः पचधात्वर्थः॥ नन्वितिफलानुकूलः फलजनकः॥ अत एवैवं धमन्यायणादौ पचतीति न प्रयोगः। विलक्षण व्यापार
इति। फलानुकूलत्वं स्वरूपेणोनिविष्टेन व्यापारे चलक्षणमात्रं ज्ञाप्यत इत्यर्थः॥ तथा च फलावच्छिन्नस्य वस्तुतो वि
लक्षणव्यापारस्य बोधकत्वादेव धात्वनां सकर्मकत्वव्यवहारः। नात्र तत्तु जानातेत्यादेरिति निध्येयं। नन्वेवं त्यजिग
म्योरिति। उत्तरदेशसंयोगावच्छिन्नक्रियागमधातोरिर्थः। पूर्वदेशविभागानुकूलां त्यजेरर्थः। तथा च यदि फ
लानुकूलोपलक्षिताक्रियैव धात्वर्थः। तदा तयोः क्रियारूपैकार्थप्रतिपादनात् पर्यायता स्यादित्यर्थः॥ इदमेव स्फु
टयति। नयार्थे हीति। तथा चेति पर्यायतान्वेति विरक्षालमननकारः अनितुपर्यायितेत्यर्थः। मिवमित्यतो नाचि
त्यादिरेकोयंथः। समाधत्ते। गच्छतीत्यादितथा च गमिसमभिव्याहृतद्वितीयया फलसंयोगः बोध्यते तथा त्यजि
समभिव्याहृतद्वितीयया फलं विभागो बोध्यत इत्यर्थः। यथोक्तातिप्रसंगः त्यजिगम्योः पर्यायताप्रसंगः॥ अवच्छे ३२
दकमेव धात्वर्थतावच्छेदकमेव तथा च त्यजिगम्योः न पर्यायिता इत्यर्थः॥ गमेरुत्तरदेशसंयोगावच्छिन्नक्रिया
र्थत्वात् तथा त्यजेरपि पूर्वदेशविभागावच्छिन्नक्रियार्थत्वादिति भावः॥ नन्वेवं ग्रामं त्यजतीत्यादौ फलस्य विभाग

देरपि धात्वर्थतावच्छेदकत्वेपि द्वितीयाविभक्तेरानर्थक्यापत्तेः तत्राह द्वितीयार्थस्त्विति। आश्रयतासं
बंधेन धात्वर्थतावच्छेदकफलस्य ग्रामादावन्वयात्। तथा च ग्रामं त्यजति खग इत्यादौ ग्रामनिष्ठविभागाव
च्छिन्नक्रियानुकूलयत्नवानिति। खगादिविशेष्यको बोधः। नचेति। एवं आश्रयत्वस्य द्वितीयार्थत्वे। भूमिपदानि
रस्तं च पतत्याश्रयत्वस्य न भूमे विद्यमानत्वात् भूमिपदोत्तरं द्वितीया स्यादिति भावः॥ समाधत्ते। समभिव्याहृ
तेति। सकर्मकसमभिव्याहृतधात्वर्थत्वावच्छेदकफलाबोधसाकांक्षत्वात् द्वितीयाया इत्यर्थः॥ अत एव
धात्वर्थतावच्छेदकफले द्वितीयार्थान्वयात् आश्रयत्वान्वयादेव शालित्वं आश्रयत्वमित्यर्थः। दूषयति। नहीति
पति। वृक्षात् भूमाविति। पतनक्रियाजन्यं फलं द्वयं एकेन समं विना उत्तरदेशे उत्तरदेशेन भूमौ संयोगश्चेति।
वृक्षभूम्योरेकैकफलवत्त्वात् उभयस्य कर्मत्वापत्तिरित्यर्थः॥ ननु तत्रापीति। संयोगानुकूलव्यापारस्य उत्तरदेश
संयोगावच्छिन्नक्रियायाः कर्मत्वे पतनक्रियावच्छेदकसंयोगाश्रयत्वं इत्यर्थः॥ पतत्यर्थेति। उत्तरदेशसंयोगावच्छि
न्नाक्रियानवतत्यर्थः॥ किंतु क्रियामात्रमिति भावः। विशेषणाच्चेति। धात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वे

निरुक्ताविव्यर्थः। संयोगाश्रयत्वेपीति। संयोगस्याविष्टत्वादितिभावः परिष्कुर्वंति। त्यनेनास्वरसः सूचितः। सचक
मत्वस्याश्रयत्वाश्रयत्वेनस्यधात्वर्थनावच्छेदकफलरूपैकदेशान्वयस्वीकारापत्तेः। तस्यवृत्तिमत्त्वाद्यस्यनि
राकांक्षत्वादिति। आदिपदादयोग्यतानासत्त्योसंग्रहः। सहकारीभावाद्यमात्रनेनेज्ञायमानेसत्सहकारीत्व
त्यर्थः। यत्पदार्थेनसहेत्यस्यस्वार्थस्येत्यादियादृशपान्वयेति। यसंसर्गकयद्विशेष्यकयत्प्रकारकान्वयेत्यर्थः।
नथाचसमभिव्याहारएवआकांक्षेतिफविशेषण अतएवतादृशान्वयस्यलक्षणेनिवेशादेव। घटःकर्मत्वमि
त्यादेः स्वरूपायोग्यत्वेनतादृशान्वयस्यनत्रातीकतयानष्टतथासमभिव्याहारोआकांक्षेत्यर्थः। अतएवनाम
धात्वाख्यातक्रियाकारकाणांनान्योन्यसमर्थानीतिनतुतदर्थकानानिमाणिक्षतः आख्यातपदेत्येनैवकारेण
आख्यातार्थकतत्वादिपदव्यवच्छेदः। तत्राधातुवाचकपदे अतएवापदविशेषणसमभिव्याहारस्यआकांक्षत्वा २३
देव। लमिवाचकेति। तथाचनतिपदस्यनतिवाचकत्वेपिनतिवाचकाख्यातपदसमभिव्याहारएवात्रआकां
क्षेति। तदभावात्रान्वयबोधस्तत्रइतिभावः। ननुधातुद्वितीयापदं आख्यातेनसमंसाकांक्षंअतःसमभिव्याहारवि

शेषणत्वआकांक्षेतिनवक्तुतद्ज्ञानादिशाब्दबोधः नामपदं तुद्वितीयादिपदसमभिव्याहृतकर्मत्वादि
बोधजनकं नतुकर्मत्वादिपदजन्यकर्मत्वोपस्थिताविततन्नियामकमित्याशंकते। नन्विति। समाधत्ते।
नाम्नइतिनतुपस्थापकं कर्मत्वोपस्थापक। विभक्तिति। द्वितीयादिविभक्तिसमभिव्याहारनआकांक्षेव
नियामिकेतिभावः। द्वैतवमिति। एवं। कर्मत्वाद्युपस्थापककर्मत्वपदअत्वादिपदानांनि। राकांक्षत्वे
नामविभक्तिधात्वाख्यातादिपदानांमेवसाकांक्षेत्यर्थः। व्युत्पत्तिःशक्तिग्रहः। उक्तस्तदइति। आकां
क्षायाः पदविशेषणसमभिव्याहाररूपायाः शाब्दसामग्र्याः अनावात्कथंतत्रतस्यपुंसोन्वयबोधइ
त्यर्थः। कश्चित्तशंकते। तथापीति। वैधुर्यमेवत्यनेनरंतस्येतिशेषः। अन्वयव्यतिरेकसिद्धेति। आकां
क्षायाः पदविशेषणसमभिव्याहाररूपयाः अन्वयव्यतिरेकेनकारणत्वग्रहात्। प्रक्लततदभावेनशाब्द
संभवादितिभावः। एतस्याःनिरुक्ताकांक्षायाः। तद्भ्रमेणनिरुक्ताकांक्षाभ्रमेणएवघटकमत्वमानयं
नंतानिरितिवाक्यं। स्वरूपायोग्यमितिनाकांक्षाकोभ्रमेणशाब्दबोधइतिमंतव्यं। वस्तुतोघटकमेत्वेतां

दोविपरितव्युत्पन्नस्यापिअन्वयबोधदर्शनात्।नत्रपुरुषभेदेनकर्मत्वादिपदसमभिव्याहारस्यैववाक्यं
त्वात्।निरुक्तआकांक्षायाविशेषविश्रामेणपुरुषभेदेनापिकार्यकारणभेदस्यसुवचत्वात्।एवंक
र्मत्वादिपदेद्वितीयाक्रमेणअत्वादिपदेआकांक्षाक्रमेणाकांक्षाक्रमात्अन्वयबोधेनकिंचिद्बाध
कमितितत्वं।अपराचेति।अपराचस्वरूपसतीहेतुराकांक्षेत्यनेननसंबध्यते।अपराआकांक्षामाहाय
क्षनेति।ननुसंसर्गकतत्तद्विशेष्यकतत्प्रकारकतात्पर्यविषयान्वयबोधइत्यर्थः।स्वजनित्यस्यवाक्यं
तज्जनेत्यर्थः।तथाचस्वजन्यप्रकृतान्वयबोधसमानाकारबोधपिरहइतिभावः।अतएवघटमायेत्या
दौकर्मत्वप्रकारकबोधतात्पर्येघटविशेष्यककर्मत्वप्रकारकबोधेजनितेप्याकांक्षाबोधद्वयेतात्प
र्यदशायांएकबोधेजनितेप्याकांक्षाप्रकृतान्वयबोधेशाब्दबोधेइत्यर्थः।निरुक्ताकांक्षायास्वरूपतो ३४
हेतुत्वेमानमाह।अतइति।प्रकृतान्वयबोधसमानाकारेत्यस्यलक्षणनिविष्टस्यफलमाह।एवंचेति
दंडेनगामानयेत्यादावित्यर्थः।गामानयेत्यतोन्वयबोधेजातेपीत्यर्थः।निराकांक्षस्यापीत्यनंतरमजनित

न्वयानुभावकत्वाभावादितिहेतुहृद्यः।उक्तमितिइदंवगोकर्मकानयनबोधेजनितेपिदंडकारणक
गोकर्मकान्वयबोधः प्रकृतान्वयसमानकारकोबोधोनजनितइतिनतत्राकांक्षावैधुर्यमितिभावः।स्वैनै
घतद्विषयइति।नचेति।योग्यतांनिर्वक्ति।एकपदार्थसमभिव्याहृतैकपदार्थेअपरपदार्थस्यसमभि
व्याहृतापरपदार्थस्य।प्रकृतसंसर्गवत्वंतात्पर्यविषयसंसर्गकत्वं।लक्षणंदर्शयतितेनेति।ईदृशयोग्य
तानिर्वचनेनइदंवाक्यंलक्षणमित्यर्थः।लक्षणेलक्षणंयोजयति।पयसीति।ननुसमुद्रजलानिप्राणेनप्रचुरं
वाक्येयोग्यस्यादित्यतआह।यस्मिंश्चेति।समुद्रादिपयसीत्यर्थः।तथाचएकपदार्थेअपरपदार्थसंसर्गेनत्व
मित्यर्थः।एवंचपयसासिंचतीतिवाक्यंयोग्यमयोग्येचतात्पर्यविषयीकृतपदयोर्भेदादितिभावः।संसर्गे
तात्पर्यविषयत्वांशेकप्रकृतत्वस्यविशेषणस्यफलमाह।आकाशंशब्दवदिति।अभेदान्वयेति।अभेदा
न्वयबोधेजननीयइदंवाक्यंनयोग्यप्रकृतिसंसर्गस्यतात्पर्यविषयस्यअभेदस्यएकपदार्थेआकाशे
अपरपदार्थस्यशब्दस्यासंभवात्।आकाशशब्दयोरभेदसंसर्गस्यतात्पर्यविषयस्यप्रकृतस्यबाधादि

त्यर्थः। अस्याः निरुक्तयोग्यतायाः तद्भ्रमेण। अयोग्यवह्निना सिंचतीत्यादावपि योग्यताभ्रमेणैवान्वय
बोधस्तत्स्वरूपेण तु योग्यतायाः न कारणत्वं अपि तु तज्ज्ञानस्येति भावः। नन्वेकपदार्थेऽपरपदार्थसं
सर्गरूपायाः योग्यतायाः ज्ञानं शाब्दबोधात् प्राक् संभवतीति कथं योग्यताज्ञानं। कारणमित्याशंकते।
ननु संसर्गस्येति। अपूर्वत्वात् शाब्दात् पूर्वमप्रतीतत्वात् ज्ञानमात्रे। संशयनिश्चयसाधारणमित्यर्थः
अस्ति चेति। तथा च शाब्दात् पूर्वं योग्यतानिश्चये ऽविद्यमाने ऽपि तत्संशयः संभवत्येवेति भवति तज्ज्ञानं का
रणमित्यर्थः। ननु योग्यतायाः संशयनिश्चयसाधारणज्ञानत्वेन कारणता यदि तन्निश्चयोऽपि क्वचित्कारण
त्वं स्यादित्यत आह। क्वचिदिति। हेतुरिति शेषः। तत्स्थलमाह यथेति। दृष्टे भूतलघटयोः संबंधे साक्षा
त्कृते। भूतले घटोऽस्तीति वाक्यजन्यभूतले घटोऽस्तीति शाब्दबोध इत्यर्थः। स्वरूपतः योग्यताहेतुत्ववा ३५
दिनाम मतमुपन्यस्यति। परे त्विति। असंसर्गाग्रहः। एकपदार्थेऽपरपदार्थसंसर्गाभावग्रहः। जलहृदेति।
इदं वाक्यं योग्यम् असंसर्गाग्रहदशायां बोध्यं दृष्टत्वादिति। लाघवात्। संशयनिश्चयसाधारणासंसर्गज्ञा

नत्वेन कारणतायां लाघवादित्यर्थः। नन्विति। असंसर्गाग्रहत्वेन कारणतायां गौरवादित्यर्थः। असंसर्ग
ग्रहस्येति। लौकिकसाक्षात्कारातिरिक्तदोषविशेषाजन्यविशिष्टज्ञानमात्रे हेतुरित्यर्थः। तथा च शाब्द
त्वावच्छिन्नप्रतिप्रतिबंधकाभावविधया हेतुत्वेन तु योग्यताज्ञानविधया हेतुत्वमिति भावः। इदमेव दर्श
यति। कथमन्यथेति। असंसर्गज्ञानस्याप्रतिबंधकत्वे चेदनेनेति। चंदने सौरभाभावेऽनुमानादिज्ञानेऽपि सुर
भि चंदनमिति लौकिकबाधदर्शनात् लौकिकप्रत्यक्षोत्पन्नेति। प्रतिबध्यतावच्छेदकत्वे विशेषणं। इद
मेवाह। चंदनावनुमितावपीति। लौकिकसाक्षात्कारान्यत्ववत्दोषविशेषाजन्यत्वविशेषणस्य प्रतिब
ध्यतावच्छेदककुक्षिनिविष्टस्य फलमाह। दोषेति। तथा च शंखो न पीत इति ज्ञाने दोषवशात् शंखः पीतविशिष्टबु
ध्युदयादित्यर्थः। घटोऽभिधेय इत्यादौ घटेऽभिधेयत्वसंबंधाभावग्रहाभावेन कारणतायां योग्यता
याः वाच्या। सा च न संभवति अभिधेयसंबंधाभावाप्रसिद्ध्या तद्ग्रहाभावत्वेन कारणता न संभवतीत्यर्थः। स
माधत्ते। अभिधेयन्वेति। घटेऽभिधेयप्रतियोगिकत्वेन यः संबंधाभावत्वमस्य ग्रहाभावत्वेन हेतुतेत्यसंसर्गा

यहेतुतेत्यर्थः। सोपि। तादृशभ्रमोपि तथाच योग्यता तादृशशाब्दबोधे न हेतुरित्यर्थः। नचैवमिति। शाब्दान्व
वच्छेदेन योग्यतायाः कारणत्वं तेनेष्टापत्त्या परिहरति। नहीति। तदीयतादृशान्वयेति। एकपदार्थे परपदा
र्थसंसर्गाहत्वेनेत्यर्थः। तथाच तत्पुरुषीयतत्पदार्थविशेष्यकतत्पदार्थप्रकारकान्वयबोधे तत्पुरुषीय
नतत्पदार्थविशेष्यकतत्पदार्थसंसर्गाग्राहकत्वेनैव हेतुतेति विशेष्यकार्यकारणभावात् घटो। निधेय
इत्यादिवाक्यजनितबोधे योग्यत्वायाः अहेतुत्वेपि नक्षतिरिति भावः। आहुरित्यनेनास्वरसः सूचितः। योग्य
ताप्रमायाः शाब्दप्रमाहेतुत्वेनेति सर्वसिद्धान्तसिद्धेति। आसत्तिश्चेति। पदाव्यवधान। प्रसक्तान्वयबोधानुकूलप
दव्यवधानाभावः। सन्निधिः सैवासत्तिरित्यर्थः। अत एव पदाव्यवधानस्यासत्तित्वादेव। गिरिर्भुक्तमिति।
अननुक्तपदेन प्रसक्तान्वयबोधाननुकूलेपदे व्यवधानादित्यर्थः। एवं पदाव्यवधानमात्रस्यासत्तित्वे। स ३६
माधत्ते। प्रसक्तान्वयबोधेति। ओदनपदव्यवधाने तु प्रसक्तान्वयबोधानुकूलव्यवधानमेवेत्यननुकूलव्यवधा
नाभावस्य विवक्षितस्य सत्वादित्यादौ। ओदनपदं चेति। स्थाल्यामिति। अधिकरणता या प्रसक्तान्वयबोधानुकू

लत्वात्। तथाच कर्मबोधकओदनंपदाभावेन प्रसक्तस्थाल्यधिकरणकौदनकर्मकान्वयाभावेननन
नुकूलत्वादिति भावः। नचैवमिति। एवं। अव्यवधानस्यासत्तिपदार्थत्वे व्यवहितत्वेनभ्रमेत्यत्र सिद्ध इति। त
थाच विशेषदर्शनात् अव्यवहितत्वभ्रमोपि न संभवतीति भावः। तत्रेति श्लोक इत्यर्थः। श्लोकपदात् श्लो
कघटकपदानां तेन श्लोकस्य पदत्वाभावेपि न क्षतिरित्यर्थः। किन्त्विति। योजनावाक्यानुक्रियाकर्मभावेना
न्वयजनकपदसमूहात्। आहुरित्यस्वरसंसूचयन् नव्यमतमाह। वस्त्विति। तद्विलंबेन पदाव्यवधान
ज्ञानाभावेन अविलंबाच्च। शाब्दबोधविलंबाभावाच्चेत्यर्थः। पदतात्पर्यज्ञानं हेतुरिति पूर्वोन्वयी। तथाच
पदतात्पर्यमासत्तिरिति। तच्चापदतात्पर्यं च अभिसंदधत्तु। अन्वयबोधं जनयत्वित्यर्थः। अभिसंधापयि
तुः। निरुक्ताभिसंदधानविषयीभूतज्ञानजनयितुरित्यर्थः। अत एव पदे तात्पर्यरूपाया इच्छाया आसत्ति
त्वादेवावक्तुरभावेपि यदोच्चारयितुरभावेत्यर्थः। अभिसंधातु। निरुक्तपदतात्पर्यरूपेच्छावतः। शुकवाक्येपि।
ईश्वरमुपलक्षणं। कर्णपाटवोच्चारितवाक्येन भगवत्तात्पर्यशरणीरिति बोध्यं। नव्यमतमपि दूषयति तदपीनेति।

सतीति।अर्थतात्पर्यज्ञानंपदार्थतात्पर्यज्ञाना।एतद्विलंबेन।पदार्थतात्पर्यज्ञानविलंबेनउपसंहरति।न
स्मादिति।वृत्त्या।शक्तिलक्षणान्यतरेण।सा।पदजन्यपदार्थोपस्थितिरूपा।एतस्याः।आसत्तेः।कारणत्वेऽ
न्वयव्यतिरेकेणाह।घटयति।नहीति।घटपदादिति।पदस्यपदार्थोपस्थापकत्वंएवसंबंधिज्ञानस्यापर
संबंधिस्मारकतयेतिघटपदस्यसमवायेनाकाशसंबंधिनया।आकाशस्मारकत्वंइतिहृदयं।आ
शुविनाशिनांतृतीयक्षणवृत्तिध्वंसप्रतियोगिनांतत्तत्पदार्थोपस्थितिनामित्यर्थः।मेलकाभावात्।एक
क्षणावस्थायित्वाभावात्समाधत्ते।क्रमिकेतिसंक्षेपइतिईदृशशक्तिज्ञानत्वेनआसत्तित्वेनकारण
तायांमानाभावात्।शाब्दत्वावच्छिन्नंप्रतिपदार्थोपस्थितेःस्वातंत्र्येणैवहेतुत्वंनत्वासत्तित्वेनेति।अ
तएववृत्त्यापदजन्यपदार्थोपस्थितेरवासत्तित्वादेवाहतृतीयांतेति।अव्यवधानेनेत्यंतस्येत्यर्थः।वै ३१
यर्थ्यमेवविवृणोति।व्यवहितेति।एकपदार्थोपस्थितौव्यवधानेनापरपदार्थोपस्थितौसत्यांपूर्वप
दार्थोपस्थितिनाशात्फलतएवसमूहालंबनोपस्थितिकारणतयाअव्यवहितोपस्थितेःकारणत्वं

रनर्थंनतुअव्यवहितोपस्थितित्वमपिकारणतावच्छेदककोटिनिविष्टमितिभावः।तात्पर्यंनिरूपयति
तात्पर्यंचेति।अस्यपदार्थस्यइतिशेषः।अभिधासंपादितानन्तपदज्ञानवत्तत्तत्पदार्थस्यान्वयज्ञा
न।अप्रयोज्यत्वे।तात्पर्यस्वरूपेणाव्याप्तेःमौनिश्लोकेवक्तुरभावात्।तत्त्वघटिततात्पर्याभावादितिभावः
तस्यतात्पर्यस्यातद्भ्रमेचेति।तात्पर्यज्ञानत्वेनभ्रमप्रमासाधारणेनकानुनुभावकरूपत्वात्।गुरुणेत्य
र्थः।संक्षेपइति।तात्पर्यज्ञानेनस्वार्थेतेन्येणकारणे।किंत्वाकांक्षासत्तिघटकतयेति।नव्यनयेआकांक्षा
यास्तात्पर्यविषयत्वान्वयाशेषानुभावकरूपत्वात्।आसत्तेश्चपदतात्पर्यरूपत्वादितिध्येयं।सोयंशब्द
इति।आकांक्षासत्त्यादिसहकृतः।शाब्दइत्यर्थः।अनिधयकेति।अर्थविशेषानिधायकेत्यर्थः।ननुकेवलं
यागाद्यसमभिव्याहृतेऽप्रययानैर्विधित्वेनाव्यवहारादतघटितेति।अर्थविशेअर्थविशेषप्रत्यायक
प्रत्ययघटितमित्यर्थः।तद्धस्वर्गकामोयजेतेत्यादिवाच्यं।अनिधायकप्रत्ययत्वंलुप्तविनक्षावपीत्य
आह।विधेरपिचेयश्चतिननुकार्यत्वज्ञानमात्रेविद्यमानेप्रवृत्त्यदर्शनात्कथंकार्यत्वविद्यातत्वर्थः॥

स्यादत आह। नन्वेति। अत्र कृतिसाध्यत्वस्य विध्यर्थत्वे। अलं च असमर्थं। तथा च आरोप्रवृत्तिज्ञाप
कता प्रवृत्तिजनिका इष्टातः प्रवृत्तिरिति क्रम इत्यर्थः। यस्य बुद्धिर्यद्विषयिणी बुद्धिरित्यर्थः। सः प्रवृ
त्तिजनकज्ञानविषयोऽर्थः। विधेरन्निधेयो वितिप्रतिपाद्य इत्यर्थः। तज्जनी चेति। तथा च ज्ञानेच्छयोः
समानप्रकारकसमानविशेष्यकत्वेन कार्यकारणभावात् कृतिसाध्यत्वप्रकारकेच्छायाः प्रवृत्तिजनका
या जनकत्वं कृतिसाध्यत्वप्रकारकविषयकृतिसाध्यत्वमेव विध्यर्थ इत्यायातमिति भावः। चिकीर्षा कृति
साध्यत्वप्रकारकज्ञानस्य न हेतुत्वं अपितु कृतिसाधनताज्ञानाभावस्येत्यत आह। सर्वदेति। सु
षुप्त्यादिकाले इत्यर्थः। उपसंहरति। न तत्साध्यत्वेन ज्ञानमिति ज्ञानाभावानन्तोऽएकोऽयं घः। दूषयति।
गौरवादिति। अभावकारणत्वगौरवादित्यर्थः। प्रामाणिकं गौरवं न दोषायेत्यत आह। सर्वदेति। सु २८
सुषुप्त्यादिकाले इत्यर्थः। उपसंहरति। अत इति। नन्वेति। एवं कृतिसाध्यत्वस्य विध्यर्थत्वे। मंडलीक्रिया
दिति। मंडलीकरणाख्यक्रियाविशेषस्य बाह्यपरिग्रहितस्य निष्फलस्य न विधिः। क्षणिको न वेतू रथा

चेष्टां न कुर्यादिति चानिदर्शितं तथा। अनिष्टजनकत्वेन तत्राऽपि तस्याऽज्ञाने पि कृतिसाध्यताज्ञानात्प्रवृत्त्यापत्तेरि
त्यर्थः। अत्र शंकते। अथेति। तथा च बलवदनिष्टाननुबंधित्वमपि विध्यर्थ इति भावः। शंकां निराकरोति। इ
ष्टमिति। बलवदनिष्टाननुबंधित्वस्य विध्यर्थत्वेऽपीत्यर्थः। प्रवृत्तिजनकज्ञानस्य बलवदनिष्टाननुबंधि
कृतिसाध्यताज्ञानस्येत्यर्थः। अज्ञानाच्चेत्यादिनाशंकितं मंडलीकरणादौ प्रवृत्त्यापादनपूर्वपक्ष इत्यर्थः।
नित्य इति। संध्यावंदनादौ इत्यर्थः। शौचाचारादिमत्वेति। आदिपदात् जीवित्वस्य परिग्रहः। अहरहरेतत्कालीनकृ
तिसाध्यसंध्यावंदनकः उदितकालजीवित्वात् इत्याकारानुमानिककार्यताज्ञानेन नित्यप्रवर्त्तक इत्यर्थः।
अन्यत्र। काम्ये इत्यर्थः। इष्टसाधनेनेति। यागादिमत्कृतिसाध्यं मदिष्टसाधनत्वात् इत्याकाराद्यनुमानिकेसा
ध्यप्रवर्त्तककार्यताज्ञानं इत्यर्थः। एवं इष्टसाधनतालिंगककृतिसाध्यताज्ञानस्य हेतुत्वे लाघवात्। इष्टसाध
नतालिंगकत्वापेक्षया इष्टसाधनताविषयत्वस्य लघुत्वादित्यर्थः। प्रवृत्तिसामान्य इति। तथा च प्रवृत्तित्वा
वच्छिन्नं प्रति एकएव कार्यकारणभाव इत्यपि लाघवं मेतव्यं। नित्य इति। संध्यावंदनादावित्यर्थः। तदभावात्। इ

ष्टसाधनत्वाभावात्। न चेष्टपदं निरुपधीच्छाविषयत्वेन न विवक्षितं किंतु इच्छाविषयत्वमात्रेणापि विवक्षितं एवं च
नित्येपि प्रत्यवायानुत्पादकरूपेच्छाविषयसाधनत्वरूपेष्टसाधनत्वमस्त्येवेत्यत आह। साध्यत्वसाध
नत्वयोरिति। ननु एकनिरूपितकार्यत्वं अन्यनिरूपितं कारणत्वं च न विरुद्धमित्यभिप्रायेणाह। कथमनयोर्वि
रोध इति। अन्वयेति साध्यत्वेष्टसाधनत्वयोरित्यर्थः। सिद्धधर्म इति। तथा च कारणताया नियतपूर्ववृत्ति
त्वघटितत्वात् सिद्धधर्मत्वमिति भावः। इदमेवाह सिद्धेति साध्यं चेति साध्यताया: कारणनियतपश्चाद्वृत्ति
त्वघटितायाः सिद्धधर्मत्वमिति भावः। इदमेव दर्शयति। सिद्धार्थो दशायामिति। तदभावात्। गुरुमतं दूष
यितं जरन्नैयायिकः प्रत्यवतिष्ठते। लाघवात्। कारणतावच्छेदकलाघवात्। कारणतावच्छेदकगौरवात्।
फलाभावात्। निरुपधीच्छाविषयरूपस्वर्गादिरूपेष्टाभावात्। इत्यर्थः। वक्तुराह इति। नित्येपि संध्यावन्दनादौ
ब्रह्मलोकावाप्तिः फलं श्रवणादित्यर्थः। एवं चेति। नित्य इति शेषः। ननु नित्यस्यापि स्वर्गफलकत्वे विश्वजि ३९
द्वत्काम्यत्वमेव स्यादित्यत आह प्रत्यवायेति। तथा च इच्छाविषयत्वमेवेष्टत्वं तच्च सुखस्येव प्रत्यवाय

परिहारसाधनत्वतया इष्टसाधनमेव नित्ये संध्यावन्दनादावपीति भावः। तत्त्वमित्यनंतरं नित्य
त्वमिति शेषः। फलवदिति। आदौ फलज्ञानं ततो फलेच्छा न द्विषमीकृतेष्टसाधनतयाधीः। ततः क्रि
याज्ञानं ततो उपायेच्छा ततो उपाये प्रवृत्तिरिति क्रमः। तथा च यदि फलेच्छैव नास्ति तदा इच्छाविषयसा
धनत्वेन ज्ञानाभावेन वा नित्ये ऽप्रवृत्त्यापत्तिप्रसंग इति भावः। इष्टत्वादिति। तथा च केवलं नित्यमस्ती
कंमपि तु नित्यकाम्यत्वमेति भावः। इदमेवाह न हि प्रयोजनेति। तत्त्वमिति। एवं। नित्यस्यापि इष्ट
साधनतया काम्यत्वे। अधिकारीति। काम्यकामनायाः अधिकारिविशेषणत्वादित्यर्थः। वेदबोधि
तेष्टसाधनतापि त्यज्यत इति पूर्वोच्चयी। अत्र हेतुमाह प्रामाणिकत्वात् प्रमाणसिद्धत्वात्। ननु का
मनाया अधिकारिविशेषणत्वाभावे काम्यसाधनताज्ञानस्य कर्मप्रवृत्तित्वावच्छिन्नं प्रत्येव कारण
त्वमत आह। कल्प्यतामिति। तथा च कामनाविरहकालीननित्याकरणप्रत्यवायेन हेतुरिति भावः।
न किंचिदेतन इष्टसाधनतालिंगकेति साध्यताज्ञानस्य प्रवृत्तिहेतुत्वे नित्ये च सोऽपि दिलिंगकं

कार्यताज्ञानहेतुत्वेविरोधइति।तथाचइष्टसाधनताविषयकत्वेतिसाध्यताज्ञानत्वेनकथंहे
तुत्वमित्यर्थः।एकस्मिन्पाकइतितथाचओदननिरूपितंसाधनत्वंतन्निरूपितंसाध्यत्वंपाके
विरुद्धमितिभावः।अन्यथासाध्यत्वसाधनत्वयोःसामान्यतःविरोधेइष्टेति।तवइष्टसाधनतालिंग
कंकार्यताज्ञानंप्रवर्त्तकंतथाइष्टसाधनताज्ञानकालीनमितिसाध्यत्वसाधनत्वयोःसामान्यतःवि
रोधेनसंभवतीतिभावः।विध्यर्थोयी।ति।तथाचबलवदनिष्टाननुबंधित्वंकृतिसाध्यत्वंइष्टसाध
नत्वंचत्रयंविध्यर्थः।तथाचज्योतिष्टोमेनस्वर्गकामोयजेतेत्यत्रबलवदनिष्टाननुबंधित्वेसतिइष्ट
साधनंकृतिसाध्योयागस्तदनुकूलश्चातिमान्स्वर्गकामपुरुषइतिबोधः।अतएवबलवदनिष्टा
ननुबंधित्वस्यविध्यर्थत्वादेव।इष्टसाधनत्वेपिकलंजभक्षणस्यकृतिसाध्यत्वेपीत्यर्थः।एवंकलं ४०
जभक्षणेकृतिसाध्यत्वमप्यस्तीत्यर्थः।विशिष्टाभावेति।इष्टसाधनत्वेसतिबलवदनिष्टाननुबंधि
त्वविशिष्टकृतिसाध्यत्वाभावोस्तीत्यर्थः।विध्यर्थनिषेधइति।नकलंजभक्षयेदितिविध्यर्थेनिषे

धइत्यर्थः।तथाचबलवदनिष्टाननुबंधित्वाभावादेवविध्यर्थनिषेधइतिभावः।कथंतर्हीति।बलवदनि
ष्टाननुबंधित्वस्यविध्यर्थत्वेश्येनेनेतिविधिःविधिवाक्यात्प्रवृत्तिरित्यर्थः।इदमेवदर्शयति।श्येनस्यहिं
सात्वेनेति।आस्तिकानां।शिष्टानां।श्येनस्यसाक्षान्नरकसाधनत्वेपिनरकप्रयोजकतयानचाप्यास्तिकानां
मप्यद्वेषोरितिभावः।श्येनेबलवदनिष्टमेवशंकते।नन्विति।सा।विध्यर्थप्रतियादिताहिंसा।नत्वकर्तुःक्र
यकर्त्तुःमरणोद्देशेनेति।तथाचगोमरणोद्देशेनकूपखननात्गोवधकर्तृत्वंतत्रकूपकर्त्तुरित्यर्थः।तत्
हिंसात्वमित्यर्थः।तथात्वापत्तेः।आत्महिंसात्वापत्तेः।अदृष्टाद्वारकेति।प्रहतेनासिसेध्यस्तवपाठादेवदृष्टद्वा
रकमेवगंगामरणानुकूलत्वमितिभावः।नहिकथमिति।श्येनस्यापिअदृष्टद्वाराशत्रुमरणानुकूलत्वमिति
नहिंसात्वमितिभावः।जीर्णनैयायिकमतंदूषयति।नव्यास्त्विति।कार्यत्वाज्ञानत्वादिनैवेति।आदिनाप्रत्ये
कंस्वातन्त्र्येणैवइष्टसाधनत्वताज्ञानत्वबलवदनिष्टाननुबंधित्वज्ञानत्वादिनाहेतुत्वंप्रवर्त्तकत्वमितिभावः।
लाघवात्कारणतावच्छेदकलाघवात्।ननुविनिगमनाविरहेणोक्तनविशिष्टधर्मेणअवच्छेदकगौरवादि

तिभावः।कारणताग्राहकलाघवादाह।वस्तुतइति।इष्टाजनके।इष्टाजनकत्वेनज्ञातेइत्यर्थः।चिकीर्षास्यात्।इष्ट
स्यात्तेनफलेष्टसाधनत्वप्रकारेच्छायाःअसंभवेपि।कृतिः इष्टापत्त्यापरिहरति।स्यादेवेति।विशेष
कारणेनदैवादहमेडलीकरणेदौमडलीकरणेभावविनियर्थः।उपायेच्छेतिफलनिष्ठगोचरेच्छेत्यर्थः।इष्टसा
धनताज्ञानमिति।तथाचमेडलीकरणंइष्टसाधनमितिज्ञानेतत्रइष्टसाधनत्वेनज्ञानाभावेनवानूननदष्ट
तिसाध्यत्वप्रकारेच्छासंभवइतिभावः।बलवदनिष्टाननुबंधित्वापेक्षयालाघवादाह।बलवदनिष्टान
नुबंधित्वेतितथाचबलवदनिष्टाननुबंधित्वज्ञानत्वेनप्रतिबंधकत्वंलघ्वित्यर्थः।निश्चयत्वेनकारणत्वापे
क्षयाज्ञानत्वेनप्रतिबंधकत्वस्यलघुत्वादितिभावः।विद्यमानेति।इष्टंचप्रवृत्त्युत्तरकालविद्यमानेच्छेत्यर्थः।
एवंचइच्छायाःस्वरूपसत्त्वयानिवेशादेवननुकृतिसाध्यत्वमेवविध्यर्थस्तद्वाचकोप्यलिङेतुविषयीभूतं ४२
इष्टसाधनत्वंबलवदनिष्टाननुबंधित्वंअतोज्ञातव्यमतआह।विध्यर्थोपीति।नन्वर्थेति।नञर्थनिष्ठ
अस्यइष्टसाधनत्वकृतिसाध्यत्वेचान्वयाबलवदनिष्टाननुबंधित्वस्येति।नञर्थेनान्वयइत्यर्थः।।तथा

चकलिंजभक्षणेबलवदनिष्टाननुबंधित्वाभावबलवद्द्वेषेनेनेति।श्येनस्यवधजनकत्वात्बलवदनिष्टज
नकत्वेनबलवदनिष्टाननुबंधित्वाभावादित्यर्थः।इष्टंचबलवदनिष्टाननुबंधित्वंचनात्वेतिकिंतुकृति
साध्यत्वेष्टसाधनत्वेतिभावः।सोयमिति।इष्टसाधनत्वकृतिसाध्यत्वादिशक्तइत्यर्थः।चेविध्यंदर्शयति।
अपूर्वेति।सविधिपरिसंख्यानियमविध्यतिरिक्तःस्वर्गकामोयजेतेत्यादिसाअपूर्वविधिरित्यर्थः।नियम
मेति।तथाव्रीहीन्नियजेतेत्यनेनव्रीहिसामान्येयागकरणत्वेनव्रीहीन्प्रोक्षतीतिव्रीहीनवहंतिव्रीही
न्नियजेतेत्यनेनननियम्यतेइतिनियमविधिः।तथाचप्रोक्षणावहननयागानांसामानाधिकरण्यात्तत्प्रो
क्षितैरेवव्रीहिभिर्यजेतेतिनियमोन्यथेनाप्रोक्षितैरपीतिभावः।परिसंख्येति।पंचपंचनखाभक्ष्याइत्य
नेनपंचनखभोजनेपरिसंख्याविधीयतइत्यर्थः।तथाचशशकशल्यकीगोधाखड्गीकूर्मश्चपंचमइति
स्पष्टमुक्तत्वात्पंचानामेवपंचनखेषुभोजनत्वान्नविधिपरिसंख्यार्थः।विधित्रैविध्येप्राचांसमतिमाह
तदुक्तमितिविधिरत्यंतेतिअप्राप्तेनएवअप्राप्तप्रापणंविधिरितिप्राचांमतेलक्षणंअपूर्वविधेर्णयंतीति।नि

यमःपाक्षिक इति।व्रीहिभिर्यजेतेति यवैर्वेति विकल्पेन यवकरणत्वव्रीहिकरणत्वयोर्लाभेव्रीहिपदसा
नियोगसाधनीभूततत्त्वे नयवव्रीहिसाधारण्येन नियोगसाधनीभूतद्रव्यत्वव्याप्यजातिरूपवाद्दिना
मपि अवहननयागादिसाधनत्वेलब्धेव्रीहीनवहन्तीति व्रीहिपदसामानाधिकरण्येनावघातादीनां
नुनवात्प्रोक्षितादेवव्रीह्योरवहन्तव्यानएवयागकारणीभूता इति नियम्यत इत्यर्थः।तत्रचेति।नह्रेष्टु
पेचनस्यापि इत्यर्थः।अन्यत्रअनह्रंपेचनरवेष्यितीत्यर्थः।तथाचदेवानूपिष्टनम्मस्यादान्मांसंनदोष
नागिनिपादेभूलीनूतस्तुत्वासामान्यतोनह्रन्यपेचनह्नेनब्रुपंचपंचनरवाइत्यनेनसंख्याविधानादि
त्यर्थः।अपूर्वविधेरुदाहरणस्यप्रसिद्धत्वाद्वयेस्तुनियमादिविधेरुदाहरणमाहव्रीहीनिति।अपेति
विधिशक्तेत्यर्थः।गुरवइत्यादुरित्यनेनसंबध्यते प्रथमतोन्यायमतंदूषयित्वास्वमतेविधिशक्तिं व्यवस्था ५२
पयितुंन्यायमतंनिराकरोतिनेष्टेति।आशुविनाशित्वेनेति उत्पत्तिक्षणोत्तरचिरकालांतरभावित्वेनस्व
र्गस्येतिदृष्टवत्वानचपरंपरेतिव्यापारद्वारेत्यर्थः।परंपराघटकापूर्वेति।प्रतियोगित्वंसयोरेकचाजनकत्वेन

यागध्वंसोनव्यापारस्तथापिपूर्वादिरेवतत्रनोपस्थितमितिभावः।नापीतिनवेत्यर्थः।कार्यत्वांत्रेतिसाध्यत्वंका
र्यत्वस्यकृतिसाध्यत्वस्यनतुकृतिसाध्यत्वान्वयेयोग्यताज्ञानंहेतुःतच्चापिएकपदार्थेपरपदार्थसंसर्गोनाव
रूपतयाज्ञातमेवेत्यतआह योग्यताचेति।अन्यएवेति अन्वयप्रयोजकत्वस्यरूपवत्वादेवचक्रेचनास्तीतिति
पेकान्वयप्रयोजकंद्रवद्रव्यत्वंनास्तीत्यर्थः।प्रवर्ततेचेति।यजेतेत्यादिविध्यर्थेचेत्यर्थः।स्वनइति।कार्यत्वेति
स्वर्गकामिकृतिसाध्यत्वान्वयइत्यर्थः।इष्टसाधनत्वेति।इष्टसाधनत्वेनाभिमतस्येवकृतिसाध्यत्वेनइष्टसा
धनत्वस्यान्वयप्रयोजकत्वादित्यर्थः।नवतइति।इष्टसाधनत्वस्ययागोसाक्षादसंभवेनपरंपराघटकापू
र्वानुपस्थितेःइष्टसाधसाधनत्वरूपयोग्यत्वग्रहमितिभावः।इत्यनीस्वमतमाह।तस्मादिति।अपूर्वमेवे
त्येवकारेण।इष्टसाधनत्वादेर्व्युदासः।तस्मिंश्चेति।अपूर्वेइत्यर्थः।विषयतयेति।तथाचयागविषयकंका
र्यमितिबोधइतिभावः।ननुशाब्दबोधेशक्तिज्ञानंतद्विषयीभूतोर्थःशाब्देनासतेप्रकृतेचशाब्दबोधेक
यंअपूर्वेनासतांतस्यानुपस्थितेःशक्तिग्रहासंभवेनशाब्दाविषयत्वादित्याशंकतेनन्वितिअत्रक

स्यचित्समाधानं दूषयितुमुपन्यस्यति। अथेति। कार्यसामान्ये इति। तथा च कार्यत्वेन रूपेण घटादिसाधारणे
न घटादौ शक्तिग्रहात् शाब्दबोधे योग्यताबलात् कार्यत्वेनापूर्वे शक्तिज्ञानमित्यर्थः। अत्रोपष्टंभकमाह।
न हीति। कस्यचित्समाहितं दूषयति। स्वज्ञानादेरपीति। आदिना स्वविषयेच्छाकृतिसंग्रहः। ज्ञानादीनाम
पि कार्यतयाऽविषयतया च यागविषयकं कार्यमिति शाब्दबोधेनासंभवात्। न त्वपूर्वे स्यादिति स्वरसत्वा
दित्यर्थः। नन्वित्यादिना शंकते। समाधत्ते। उच्यत इति। कार्य इति यागादिक्रियायामित्यर्थः। स्वर्गका
मस्य प्रवर्त्तमानपुरुषस्य नियोज्यनियोजकभावमेवाह। तत्र कामीति। अतः कार्य इति यागादावित्यर्थः।
नियोजकत्वं चेति। तत्कामीति स्वर्गकामीकृतिसाध्यतयेत्यर्थः। अत्र चेति। यागादिक्रियायां स्वर्गकामीकृ
तिसाध्यत्वान्वये इत्यर्थः। अन्वयप्रयोजकेति। योग्यतेत्यर्थः। काम्यसाधनत्वं इष्टसाधनत्वं इत्यर्थः। कार्यते ४३
यागकृतिसाध्यतयेत्यर्थः। स्वर्गस्य साधनं संभवतीति यागादिक्रियायाः आशुविनाशित्वेन कालान्तरभा
विस्वर्गसाक्षात्साधनत्वासंभवात् परंपराघटकादृष्टोपस्थितिरेव योग्यता च यागविषयके कार्य

मिति शाब्द इत्यर्थः। न तु यागविषयकज्ञानादेरुपस्थितिरित्यर्थः। काम्येति। स्वर्गकामो यजेतेत्यादौ नित्ये
अहरहः संध्यामुपासीतेत्यादौ निषेधः न कलञ्जं भक्षयेदित्यादावित्यर्थः। अपूर्वमाहेति। तथा च सर्वत्राऽपू
र्व एव विध्यर्थः। अपूर्वेणान्वयेति। तथा च पदार्थान्तरमेव शक्तिरिति भावः। कार्यत्व इति। एवं च लिंगः
कार्यत्वेन रूपेण अपूर्वरूपकार्योपस्थितिः। शक्त्या कार्यत्वोपस्थितिश्च लक्षणयेत्यर्थः। एवं च पचेदित्या
दौ लौकिके लिङा लक्षणया कार्यत्वोपस्थितौ तस्य चाश्रयाश्रयिभावसंबंधेन पाकेऽन्वयात् पाकः कार्य
इति शाब्दबोधः। एतावता प्रबंधेन गुरुमतं निष्कृष्य दूषयितुमाह अन्ये तूच्यत इति। लाघवात् कार्यत्वस्य कृति
साध्यत्वस्य साध्यत्वासंसर्गेण कृतिमत्त्वरूपस्यैव शक्यत्वे लाघवादित्यर्थः। नत्विति। कार्यत्वविशिष्टे कार्ये
इत्यर्थः। गौरवात्। नानाकार्येषु शक्तिकल्पने गौरवात् कार्यत्वान्वयसंभव इति। कृतिसाध्यरूपकार्यत्वान्व
ये इष्टसाधनत्वयोग्यता सा चाशुविनाशिक्रियासाक्षात् ज्ञातुमशक्येति कार्यतान्वयसंभव इत्यर्थः। बाध
काभावात्। कृतिसाध्यत्वरूपकार्यत्वान्वये बाधकाभावादित्यर्थः। नचेदिति। न हीत्यर्थः। संकान्वयीत्यर्थः।

समुद्रजलानिष्पाणोप्यमपि यस्मासिंचतीतिवाक्येप्ययोग्यं न स्यात् संकान्वयप्रयोजकद्रवद्रव्यत्वरूपायो
ग्यतायास्तत्रापि सत्वादित्यर्थः। किंत्विति। प्रकृतसंसर्गे एकपदार्थे तात्पर्यविषयापरस्य पदार्थसंसर्ग इत्य
र्थः। नन्वेतादृशयोग्यतायानिश्चयोंशाद्बोधात्प्रागसंभवतीत्यत आह। तस्येति। निरुक्तप्रकृतसंस
र्गवत्वयोग्यत्वस्येत्यर्थः। नचयागइति। कार्यत्वसंशयः साधनत्वसंसर्गसंशय इत्यर्थः। येने
ष्टं स्यात् काम्यकार्यत्वान्वये योग्यताज्ञानविरहः स्यात् बोधयितुमशक्यत्वादिति। साक्षात्साधनत्वबा
धात् परंपराघटकानुपस्थितौ साधनत्वस्य बोधयितुमशक्यत्वादित्यर्थः। उक्तबाधकेति। साक्षात्सा
धनत्वबाधात् परंपराघटकानुपस्थितेश्चेत्यादिबाधकेत्यर्थः। साक्षात्परंपरात्वव्युदस्येति। साधनत्वेन
रूपेण साधनत्वं अन्यथासिद्धनियतपूर्ववृत्तित्वं अवगम्यत इत्यर्थः। तथा च पूर्ववृत्तित्वं कारणताघट ४४
के साक्षात्परंपरयैवेति विशिष्यते न गृह्यत इति भावः। शाब्दसामान्य इति। शाब्दसामान्यविषयेत्यर्थः। अत्र
विध्यर्थे इष्टसाधनत्वे साक्षात्त्वबाधे। साक्षात्साधनत्वबाधे परंपरान्वयेति। परंपरासाधनत्वप्रकारकमित्यर्थः।

कार्यलिंगप्रत्ययजन्यमित्यर्थः। तच्च परस्परासाधनस्य प्रकारकज्ञाने चेत्यर्थः। द्वारानुपस्थितेः। अपूर्व
रूपद्वारानुपस्थितेः। तथा च द्वारोपस्थित्यर्थं विधेरेव तत्र शक्तिरिति भावः। तदुपस्थापकेति। छिद्रेतरत्वो
पस्थापकेत्यर्थः। शाब्दबोधे पदपदार्थोपस्थितेरेव हेतुत्वात् छिद्रेतरत्वबोधकपदाभावात् छिद्रेतरत्वप्र
कारतया निष्पत्तुमशक्यत इति भावः। नच लक्षणयेति। घटपदस्य वच्छिद्रेतरघटत्वेन घटबोधकत्वं लक्ष
णयेत्यर्थः। ननु नियतान्वयव्यतिरेकित्वमेव तत्र नायात्या लक्षणया एवच्छिद्रेतरत्वप्रकारकबोधज
नकत्वमत आह। आस्तां चेति। अत्रापि नाघटेन जलमाहरेत्यादौ छिद्रेतरत्वसमुच्चयः। साक्षादन्यसाधनत्वे
ति। तथा च लक्षणया इष्टस्य स्वर्गादेः साक्षात्साधनत्वेनैव लिंगाबोध्यते यागादिति भावः। किंतः छिन्नत्वबा
धकाभावात् इत्यर्थः। आशुविनाशिनः इत्यस्य यः क्षणवृत्तिध्वंसप्रतियोगिनः फलजनकत्वादित्यर्थः। अन्व
यप्रयोजकयोग्यत्वमिति भावः। शेषः। तथा ज्ञानस्थायि व्यापारजनकत्वेन रूपेण योग्यताज्ञानं न वतीत्य
र्थः। तथा चापूर्वरूपस्थायिव्यापारानुपस्थितौ निरुक्तयोग्यताज्ञानेन न संभवतीत्यपूर्वस्य विधिशक्तिप

त्वमिति भावः॥ निरासादिति सन्निधानादौ कालेन निश्चिते योग्येपि सत्त्वादिना निवासादित्यर्थः। तथाचापूर्वे
बाध्यतां विना प्रसङ्गोऽन्वयप्रयोजकरूपवत्त्वरूपयोग्यताज्ञानविरहेपि शाब्दज्ञानकारणविरहत्वेन निरु
क्तैकपदार्थेऽपरपदार्थसंसर्गवत्त्वं योग्यत्वं ज्ञातुं शक्यत इति भावः। एवं अपूर्वस्य विधार्थप्रतिपाद्यत्वेऽ
पूर्वं मानं इति। अपूर्वे किं मानमित्यर्थः। आशुविनाशिनः यागादिनिशेषः स्थायिव्यापारजनकत्वं यागादि
ध्वंसेनापि निर्वहतीत्यतो भावरूपा। तथाचापूर्वद्वारा यागादि स्वर्गजनकमिति सिध्यत्यपूर्वमिति भावः।
न च प्राचार्योक्तिमाह। न तु उक्तमिति। चिरध्वस्तं फलायालं न कर्मातिशयं विना। संयोगो निर्विशेषाणां न
भूतैः संस्कृतैरपि। अत्र चिरध्वस्तयागादिकर्म अतिशयं विना व्यापारं विना फलाय न अलं न समर्थमित्य
र्थः। चिरध्वस्तस्य कारणस्य व्यापारद्वारैव कारणत्वं बोध्यं। यथा तु अनुभवस्य संस्कारद्वारकस्य स्मृतौ। ननु नो ८५
ग्यनिष्टमेवादृष्टमस्तु कारणं नात्मनि तत्सिद्धत्वाशंकया उत्तरमाह। संयोगइति निर्विशेषाणां। अदृष्ट
रूपविशेषगुणशून्यानां आत्मनां संयोगः समीचीनो योगः अन्यात्मनियतो योगः। संस्कृतैरपि अदृष्टवत्

यात्वीसंस्कृतैरपि भूतैर्न स्यात् भूतानां शरीरादीनां सर्वात्मसाधारण्यात् तददृष्टसंसृष्टैरेव शरीरेन्द्रियादिभिः सं
योगजननादित्यर्थः। तथाचायैरप्यनैयत्युक्त्या अदृष्टं व्यवस्थापितं। तदिदमापाततः यागध्वंसादेरेव व्यापार
त्वसंभवात्। न चैवं संस्कारोपि मास्तु अनुभवध्वंस एव स्मृतिजनने व्यापारोस्त्विति वाच्यं। स्मृतिप्रवाहाप
त्तेः न च बोधकाभावादेवतिप्रसंगोयं निरसनीय इति वाच्यं। एकजातीयाबोधकस्थाने स्मृतिप्रवाहस्य
तदवस्थत्वात्। अत्र प्राञ्चः। प्रतियोगिध्वंसयोरेकत्राजनकत्वनियमात् अनुभवतद्ध्वंसयोरेकत्र स्मृतौ कारणत्वा
संभवात् संस्कारसिद्धिः। एवमनेनैव नियमेनापूर्वस्यापि सिद्धिरित्याहुः। वस्तुतः एतस्यां व्याप्तौ मानाभावेना
सामंजस्यमेवैतदिति वाच्यं। तथा तु अनुभवस्य ध्वंसद्वारा हेतुत्वे स्वध्वंसादिसंबंधेनानुभवस्य स्मृतिप्र
तिहेतुत्वे वाच्ये। तथा च स्वत्वघटिततया घटत्वप्रकारकानुभवत्वोरेव कार्यकारणभावानन्त्यापत्तेः। मम
लाघवादुपेक्षायकता संबंधेन घटत्वप्रकारकसंस्कारवत्त्वे घटत्वप्रकारकानुभवस्य स्मृतिकारणत्वादि
ति किंच अपूर्वेपीकारेपि स्वल्पविशेषे लाघवासिद्धेः यागादिजन्यं व्यापारान्तरं अपूर्वमेव कल्प्यते लाघवात्।

तथाहिंसात्वस्य सर्वांगीणत्वेन जन्यसंयोगात्मकत्वयागेन गौरवान्नेनतावद्ध्वंसद्वारा स्वर्गजनने गौरवात्तद्धरे गौरवान्ने
नेकमपूर्वं जन्यत इत्येकः कल्प्यते लाघवात् तथा दर्शपौर्णमास्यादियागादिजन्यं एकं परमापूर्वमेव व्यापारत्वेन क
ल्प्यते लाघवात् ननु तदपूर्वकतत्तद्व्रीहियागप्रयाजयागादीनां व्यक्तिध्वंसद्वारा दर्शपौर्णमासादियागव्यक्तेः कारणत्वे
गौरवात् किंच ध्वंसस्य व्यापारत्वे दंडादिध्वंसे सति घटाद्युत्पत्त्यापत्तेः अथ क्वचिदेव ध्वंसो व्यापारोस्तु ननु सर्व
त्रेति चेन्न कारणीभूताभावप्रतियोगित्वस्य प्रतिबंधकत्वपदार्थतया कारणत्वप्रतिबंधकत्वयोश्च विरुद्धत
या यागादौ कारणत्वं ध्वंसद्वाराकत्वप्रयुक्तप्रतिबंधकत्वेन न संभवतीत्यादि द्रष्टव्यं अपि च प्राग्युक्तलाघ
वात् क्तेर्जागरूकत्वात् इत्यादि धर्मकल्पनातः अपूर्वकल्पनातः धर्मकल्पनायां च यागादिधर्मणि स्वर्गका
रणत्वं तत्स्थापितत्वधर्मकल्पनाया इत्यर्थः नत्वपूर्वं स्वरूपं कल्पयितुमिति शेषः युक्तमिति पूर्वान्वयि इदानीं ४६
यागकरणीयस्तुणोनेतरं न यजेयमिति यागसत्वकाले यागाभावविषयकालौकिकसाक्षात्कारो विरुध्यत इति
यागो न स्यात्स न्यायातिनावः सः अर्थवादः गुणवाद इति नरति मृत्युं तरति ब्रह्महत्यां योश्वमेधेनेत्यादिवाक्यमित्यर्थः

भूतवाद इति यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमित्यादि
वाक्यं भूतार्थवाद इति जननाम यंश्वर इति वाक्यं प्रमाणं यदि तदुक्तमिति विरोधे गुणवादो यद्वा
रिदपि अस द्गुणवादः यथा नरति मृत्युमित्यादिवाक्यमित्यर्थः वस्तुतो वाजपेयेत्यादौ स्वर्गफलस्येव
वक्षि समानव्याहारेण श्रवणादिति भावः अवधारित्व इति प्रमाणांतरेण निर्णीतार्थज्ञापकः शब्द इत्य
र्थः यन्न दुःखेन संभिन्नमित्यादिवाक्यं परिणाम सुखसममात्रफलमित्यादिवाक्यं चेत्यर्थः श्रुतीत्यात्रत्य
क्षप्रमाणेन रसनया चक्षाकत्वविशाब्दविषयार्थनिर्णयादित्यादित्यर्थः तदनादिनीतचक्षालित त्र असद्गुण
ज्ञापकः शब्द इत्यर्थः यथा जननाम यंश्वरः यथा वा सुअर्णेपि मात्वैव यं राजेति प्रसुभते इत्यादि बोध्यः अनित्य
ध्वंसप्रतियोगी उत्पत्तिमान्भवेत्यर्थः प्रमाणमंत्रार्थतपत्र इति शब्दनित्यवादी शंकेत गुरव इति शब्दनित्यता
प्रमाणयति नित्यशब्द इति व्योमैकगुणत्वात् व्योममात्रवृत्तिगुणत्वादित्यर्थः तेन गगनघटसंयोगादौ न व्य
भिचारः तत्परिमाणवत् गगनपरिमाणवत् अप्रयोजकः प्रसतानुमानेन अनुकूलतर्क इत्यर्थः अन्यथानुपपत्तेः

रादृनित्यतांविनाप्रत्यभिज्ञानानुपपत्तेरित्यर्थः।तथाचशब्दोयदिनित्योनस्यात्तदाअभेदप्रत्यभिज्ञानविष
यानस्यात्इत्यनुकूलतर्कइतिभावः।साधकाभावात्।मात्वेबाधकाभावान्इतिभावः।उत्पन्नादिति।उत्प
न्नोगकारःविनष्टोगकारइत्यादिप्रतीतिरित्यर्थः।तस्याइति।उत्पत्त्यादिप्रतीतेरित्यर्थः।तस्याइति।उत्प
त्त्यादिप्रतीतेरित्यर्थः।व्यंजकवायूत्पत्तिरिति।नवतांशब्दोत्पत्तिनियामकवायोरेवास्माकंशब्दव्यंजकत्वमि
तिवायुगतोत्पत्तिरूपनायकबलाद्भासतइत्यर्थः।गकारगतत्वेनेति।तथाचवायूत्पत्तिवायोरवभासेन
नगकारेपीतिभाव।नचसाविति।गकारादिविशेष्यकोउत्पत्त्यादिप्रत्ययइत्यर्थः।बाधकाभावात्एतस्या
प्रतीतेःप्रमात्वेबाधकत्वाभावादित्यर्थः।प्रत्यभिज्ञानमिति।सएवायंगकारःसैवेयंगुर्जरीरागइत्याद्यभेद
विषयकप्रत्यभिज्ञानमित्यर्थः।अन्नयैवेति।उत्पन्नत्वादिप्रतीत्यैवेत्यर्थः।साबाधितेति।साप्रत्यभिज्ञा। ४१
बाध्यमेवत्वित्यर्थः।अत्रबाध्यबाधकभावेएवमित्यस्यविवरणंविनिगमकाभावेबाध्यबाधकभावे
विनिगमकाभावेत्यर्थः।बाधितत्वमिति।उक्तत्वदनंतरमुत्पत्तिरिति।नाशप्रत्ययस्यप्रमात्वमित्यर्थः।उभ

योर्बाधितत्वेति।उत्पत्तिविनाशप्रत्यययोर्द्वयोरित्यर्थः।बाध्यत्वकल्पनेनेति।भ्रमत्वकल्पनयाभित्यर्थः।
इदंचापाततः।उभयज्ञानेप्रमात्वकल्पनापेक्षयाप्रत्यभिज्ञानमात्रस्यप्रमात्वकल्पनायांलघुत्वस्यापि
वक्तुंशक्यत्वादित्यर्थः।उभयोरेवेति।सएवायंगकारइतिप्रत्यभिज्ञानोत्पन्नोगकारइतिज्ञानयोरेवेत्यर्थः।
एतनु।उभयोरेवज्ञानयोःप्रमात्वं।अनयोरेकतरबाध्यविरुद्धार्थग्राहकत्वादितिभावः।प्रत्यभिज्ञानस्येति।
सएवायंगकारइतिप्रत्यभिज्ञानस्यइदंत्वावच्छिन्नेगत्वादिजात्यवच्छिन्नभेदाभावोविषयः।नतुतद्व्य
क्त्यभेदरूपतत्तद्व्यक्तितादात्म्यंविषयइत्यर्थः।तथासति।गत्वादिजात्यवच्छिन्नभेदाभावविषयकत्वे
सतीत्यर्थः।नन्विति।सोयमित्यनेनतत्तद्व्यक्त्यभेदोभासतेननुगत्वावच्छिन्नाभेदइतिनानित्यत्वंवर्णस्येति
भावः।सोयमित्यस्येति।तद्व्यक्तिरिति।तद्व्यक्तित्वभावप्रधानोनिर्देशःतदवच्छिन्नाभेदस्यतद्व्यक्तित्वेतद्व्य
क्तिगत्वाद्यवच्छिन्नाभेदविषयकतयैवनिर्वाहादित्यर्थः।गकारोयमितितथाचगत्वत्वेनरूपेणगव्यक्तिर
त्यवच्छिन्नाभेदएवभासतइत्यर्थः।तथासति[illegible]जात्यवच्छिन्नाभेदविषयकत्वेसतीत्यर्थः।गत्वजाति

इति तथा च गत्वावच्छिन्नानेदमासमाने घिगत्वोपरि जातित्वं वैशिष्ट्यमानन्तामपि विरहात् जातित्वेन गत्वावच्छिन्ना
नेदेन नासते नपि तु गत्वावच्छिन्नानेद एवेति भावः। शब्दस्य शब्दस्य नेदमते नित्यत्वमाह शब्देति। अत्र स्यस्वरूपस्य
त्वमात्रे हेतौ नकर्मादौ व्यभिचार इति द्रव्यत्वपदं उक्तं देशमात्। शब्द नित्यत्वे हेत्वादि विशिनाशप्रत्ययोर्भ्रमत्वक
ल्पनामपेक्ष्य एवायमिति प्रत्यभिज्ञानमात्रस्यैव भ्रमत्वकल्पने नेन पीयसीत्याह उक्तदोषात् इत्यर्थः। तथा च
बाधकस्य प्रबलता अनुमाने दोष इति भावः। अत्रानुमाने स्वरूपासिद्धिं शंकते। शब्दस्येति। न च इदमनुमानमेव मानं द्रव्य
त्वे शब्दस्य न विष्यतीत्याह शब्द इति। साक्षात्संबंधेनेति। साक्षात्संबंधत्वं च संयोगसमवायान्यतरत्वमित्यर्थः। अ
प्रयोजकत्वात्। अनुकूलतर्काभावात् प्रतिकूलतर्कमाह नीरूप इति। तथा च शब्दो यदि नीरूपद्रव्यं स्यात् तर्हि बहिरि
न्द्रियग्राह्यं न स्यादिति प्रतिकूलतर्कादित्यर्थः। सरूपद्रव्यत्वं च प्रत्यक्षबाधितमिति भावः। शब्देकदेशिमतमा ४८
ह। अन्ये त्विति। शब्दमात्रे घनो व्यभिचारीति पन्यन्येति। द्रव्यत्वं च घटे व्यभिचारीति शब्दत्वं हेतौ विशेषणं दत
पत एवेति। अप्रयोजकत्वादेवेत्यर्थः। द्रव्यगुणान्तरस्पर्शाद्दृष्टाचेति। दृष्टान्तासिद्धमेवाह। नहीति। स स्फोट इति।

वर्णादर्शरूपाणां। वर्णसमूहरूपाणां मेलने एकक्षणावस्थायित्वेत स्यासंभवादित्यर्थः। अप्रत्यक्षत्वमिति
पदानामिति। आकृतिने नान्वयी। तथा च पदानामप्रत्यक्षत्वापत्तिरित्यर्थः। तदप्रत्यये यदा प्रत्यक्षं इत्यर्थः। प
दं स्फोट इति यो। तदा च पदप्रत्यक्षासंभवे पदस्फोटेनैव पदार्थोपस्थितिसंभवादिति। तावद्वर्णेति। तावतां पदघ
टकीभूतानां वर्णानामित्यर्थः। तद्वर्णाभिव्यक्तीति। पदघटकीभूतवर्णाभिव्यक्तिव्यंग इत्यर्थः। क्रमिकाणामि
ति। घटादि। नामेलनमस्त्येवेत्यत आशुतरेति। आशुविनाशिनां दशापुरुषीयदशाज्ञानां युगपदुत्पन्नानां मेल
नमस्त्येवेत्यतो क्रमिकमिति। घकारमात्रेति घटमात्रेत्युपलक्षणं। कदाचित्टकारादिमात्रादपि अर्थप्रत्ययापत्ते
रेत्यपि बोध्यं। तदसंभवात् पदघटकीभूततावद्वर्णाभिव्यक्तीनां एकदासंभवादित्यर्थः। घकाराभिव्यक्त्यनन्तरं
टत्वनिर्विकल्पकानंतरं टत्वविशिष्टसाक्षात्कारावसरे ज्ञानादीनां आशुविनाशित्वात् घटज्ञाननाशात्तावद्व
र्णाभिव्यक्तीनां युगपदसंभवादिति भावः। सएव पूर्वपूर्ववर्णसाक्षात्कारादेवार्थप्रत्ययसंभवात् स इति च र
मवर्णपितं इत्यर्थः। अलं स्फोटेन। व्यर्थमित्यर्थः। तथा च स्फोटं विनैव वर्णगोचरसंस्कारसहितचरमवर्णसाक्षा

कारादेवार्थप्रत्यसंभवादितिभावः।तत्सिद्धिः स्फोटसिद्धिः।तस्यपदप्रत्ययस्य।क्रमविशेषेणेति।घात्ववाहि
तोत्तरवृत्तिघत्वव्यवहितोत्तरवर्त्तिअमादिविषयत्वादित्यर्थः।नसंभवतीतिवर्णानांआविनाशित्वाच
ऽनाशोत्पत्तिकालइतिपदप्रत्ययोऽसंभवतीत्यर्थः।नचतत्प्रत्ययःआनुपूर्वीप्रत्ययः।आनुपूर्वीगो
चरसंस्काराभावादितिभावः।घोत्तरत्वंहीतिटस्यघोत्तरत्वंघवृत्तीछावत्वइत्यादिवत्त्वाचकालिकेनसंब
धेनबोध्यः।प्रनिष्ठणंकिंचिद्भुतघ्नेतोकिंचिद्भिन्नस्यतीन्यायेनानादेशोसेसारकस्यचिच्छायाः।अपिसंभवादि
तिभावः।तस्यप्रत्यक्षत्वमिति।तस्यआनुपूर्वीविशेषणस्यप्रत्यक्षत्वे।अलौकिकंप्रत्यक्षत्वं।घोत्तरंटमिति।
घोत्तरत्वांशोऽलौकिकटांशेसविकल्पकंनसिद्धाकारकंलौकिकालौकिकविषयताशालीज्ञानंभवतीतिभा
वः।दिगिति।दिगर्थस्तुलाघवात्‌अनुपूर्वीज्ञानस्यस्वातंत्र्यौवप्रत्यायकत्वेनत्वानुपूर्वीविशिष्टपदज्ञानत्वे ४९
नलिंगगौरवादितिध्येयं।मीमांसकमतंदूषयितुमच्छापयति।नाचितिप्रमाणांतरं।प्रत्यक्षादिप्रमाणभिन्नंइद
मानमित्यर्थः।नकल्पयति।अर्थापत्तिरूपंप्रमाणंवा।रात्रिभोजनविषयकज्ञानजनकंकल्पयतीत्यर्थः।नचन

प्रत्यक्षातीति।नत्रा।रात्रिभोजनविषयकज्ञाने।प्रत्यक्षादीत्यादिना।अनुमितिशाब्दोपमितिसंग्रहःतेषां
सामग्रीविरहादितिभावः।दूषयति।केवलव्यतिरेकिणेति।अर्थापत्तिपदमिति।नचैवंतादृशज्ञानोत्तरमर्था
पर्यामीत्यनुभवदर्शनात्‌अर्थापत्तिरितिमानांतरंभविष्यतीतिवाच्यं।अर्थापत्तित्वव्याप्यत्वमेवातएवनानुमि
नोमीतिनवत्रयीरितिवदंति।एतिह्यवादिमीमांसकमतंदूषयति।अविदितेति।अनिर्णीतिकर्तृकः।आकाश
वर्णादिरित्यदिर्थः।इदंप्रमाकरणनिरूपणं।प्रमात्वसिद्धौप्रमात्वस्यज्ञानविषयत्वइत्यर्थः।तत्ज्ञानेप्रमात्वा
श्रयस्यज्ञानंतस्यप्रमात्वाश्रयस्येत्यर्थः।तथाचज्ञानातींद्रियत्वेज्ञानगतंतत्प्रमात्वमप्यतींद्रियत्वमितिभा
वः।ननुविषयोतरसंचारइति।तथाचज्ञानज्ञानधारैवस्यात्‌ननुघटादिविषयांतरविषयकेज्ञानमिति
कदाचित्स्यादित्यर्थः।अत्रज्ञानातींद्रियत्वपूर्वपक्षेऽप्यतएवमिति।मातामेयादीनांज्ञानस्यएकसामग्री
कसामग्रीकत्वादेवात्रिपुटीप्रत्यक्षेतेति।तथाचप्रामाण्यस्यापिस्वप्रकाशगम्यत्वंस्वतस्त्वंतेषां।सिद्धमि
तिमंतव्यं।स्वात्मनः।चाक्षुषज्ञानात्मनः।विषयसन्निकर्षेति।विषयस्यसंन्निकर्षस्यचहेतुत्वादित्यर्थः।

कारणीभूतविषयस्याभावमाह। नचेति। कारणीभूतसंनिकर्षाभावमाह। संनिकृष्टेचेति। द्रव्यगुणोत्त
माह। कथमिति। त्रिपुटीप्रत्यक्षेण घटादिचाक्षुषेऽात्मनानसामग्र्यमप्याह। कथंचेति। चाक्षुषादिपदा
नाप्रत्यक्षत्वात् ज्ञानतया प्रमाणाभावेन न हेतुना अनुमातुं चाशक्यादितिभावः। स्पार्शनेऽभूतस्पर्शेऽप
रिग्रहः। तेन स्पार्शनेऽभूतस्पर्शवत एव द्रव्यस्य योग्यत्वादित्यर्थः। तथाच स्पार्शनघटादिप्रत्यक्षेऽपि
नात्ममनःसामग्रीतिभावः। अन्यथा तादृशकार्यकारणभावानंगीकारे चाक्षुषग्रहापत्तेरित्युपलक्षणं।
उक्तसामग्रीविरहेऽपि त्वग्ग्रहे स्पार्शनापत्तेरपि द्रष्टव्यं। ज्ञानमनुमित्या गृह्यते न त्वनुव्यवसायेनेति।
नद्वितमतमाह। न ह्यस्त्विति ज्ञानं नावदिति। स्वविषये घटादावित्यर्थः। तथाच घटादेरेव समवायि
कारणं ज्ञानं निमित्तकारणं समवायिकारणं नापेक्ष्यते भावकार्यस्य समवायिकारणकमिति नियम ५०
स्तुनास्त्येवेतिभावः। तयैव ज्ञाततयैव ज्ञाततायाः निरस्तत्वादिति। अतीतघटादौ ज्ञातः स घट इत्या
धप्रत्ययापत्तेः घटस्य नष्टत्वेन समवायिकारणाभावेन ज्ञाततया एव तत्रानवितुमशक्यत्वादितिभावः

साध्याप्रसिद्धेरिति। साध्यप्रसिद्धिरनुमानांगं प्रत्यक्षेण च ज्ञानानामिन्द्रियत्वेन भावः। नन्वित्यादि यावत्संकेतसमाधा
ने मनसैवेति। विषयान्तरसंचारेति। उपलक्षणमेतत्। ज्ञानज्ञानादिसामग्र्यभावादित्यपि द्रष्टव्यं। न तु प्रतिबंधकत्वे
विषयान्तरसामग्र्याः प्रतिबंधकत्वमित्यर्थः। तस्य ज्ञानस्येत्यर्थः। साध्याप्रसिद्धेः प्रामाण्याप्रसिद्धेरित्यर्थः। ज्ञानानु
मितिरिति घटो ज्ञानवान् ज्ञाततावत्त्वात् इत्यनुमित्या घटे घटत्वप्रकारकं घटविशेष्यकज्ञानं गृह्यमाणे घट
त्ववद्विशेष्यकघटत्वप्रकारकरूपं घटज्ञानप्रामाण्यमपि विषयीकरोतीत्यर्थः। व्याप्त्यासिद्धेरिति। लाघवतर्कोपि
सहकृते तेनेश्वरबाधसहकृतेन चेति बाध्यो। तेनयच्चपर्वतीयवह्नेर्लाघवमिति। लाघवज्ञानं पर्वतः पर्वतीयव
ह्न्यतिरिक्तवह्न्यभाववानिति नवाधनिश्चयो वा यदाप्यतिदाव्यापकताव...देकरूपेणापि पर्वतः पर्वतीयव
ह्निमानित्यिकारकानुमितिस्वीकारेऽपि न। क्षति। व्यभिचारादिति। अप्रामाण्ययज्ञानतामादाय व्यभिचारादित्यर्थः।
साध्येति। प्रमात्वाप्रसिद्धेरित्यर्थः। प्रकारेति। स्वप्रकारादिनामेतेषां गुरूणां मते किंचिदवशिष्यत इतिभावः। अप्र
सिद्धेः। प्राभाकरमते ज्ञानस्यात्मनश्च प्रत्यक्षेणायोग्यत्वेन मितिमात्रोश्च नानासेनवेन स्वप्रकाशताप्रामाण्यस्य न

संभवतीति। किं चेति। एवं ज्ञानप्रामाण्यस्य स्वतस्त्वे संशयो न स्यादिति। निर्णीते संशयो न स्यादिति। तदे
वाह। ज्ञानग्रहेति। अग्रहेति। ज्ञानग्रहस्य स्वप्रकाशतयाऽऽवश्यकत्वं स्वविषयकज्ञानगम्यत्वं तद्व्याघातादित्यर्थः।
यात्प्रामाण्याश्रयज्ञानाग्रहेऽपि नास्तीत्याह। धर्मीति। तथा च धर्मिज्ञानस्य संशयहेतुत्वेन तदन्तर्भावात्प्र
प्रामाण्यसंशयोऽपि न स्यादित्यर्थः। एवं च संशयहेतुतानुरोधेन धर्मिज्ञानस्यावश्यकत्वे स्वतस्त्वं प्र
माण्यस्य धर्मिज्ञाने तत्प्रामाण्यविषयीकरणे संशयायोगादविषयीकरणे तु स्वतस्त्वहानिरिति भावः।
तज्ज्ञेति। तत्प्रामाण्यं प्रथमानुव्यवसाये न घटमहं जानामीत्याद्याकारेण ज्ञाते प्रामाण्याश्रयविषय
केनाद्यज्ञानेनेत्यर्थः घटत्ववत्त्वाभावादिति। व्यवसायोपनीत इति। व्यवसाय एवात्र प्रत्यासत्तिरित्यर्थः। ज्ञा
नस्तत्त्वादिति। ज्ञाता घटत्वादिमत्त्वेन प्रागनुपस्थितं ज्ञातम् इत्यर्थः। ज्ञानेऽपि व्यवसाय इत्यर्थः। तथा च घटत्ववतः। ५२
पूर्वमनुपस्थितत्वेन घटत्वस्य च पूर्वमनुपस्थितत्वेन घटत्ववद्विशेष्यकतासंसर्गेण घटस्य घटत्वप्रका
रकतासंबंधेन घटत्वस्य च प्रकारत्वसंबंधेन प्रामाण्यग्रहादित्याखेडनार्थः। तथा च घटवान् घटत्ववानि

जानामीत्यनुव्यवसाये। वस्तुतो प्रतियोगित्वानुयोगित्वयोरिव तत्प्रकाशत्वस्यापि तत्तद्विशेष्यतासंबंधेन ना
न संभवादिति तत्त्वं। तत्तत्प्रकारकेति। अत्रस्य ग्रहत्वं च प्रागुक्तयुक्त्या पूर्वमनुपस्थितस्यापि सुग्रहत्वेनेत्यव
धेयं। यद्वा घटत्ववद्विशेष्यतासंसर्गेण घटस्य घटत्वप्रकारतासंसर्गेण घटत्वस्यापि सुग्रहत्वेनेत्यर्थः। उभ
यस्येति। तद्विशेष्यकत्वतत्प्रकारकत्वस्य चेत्यर्थः। एतावदेव तद्विशेष्यकत्वतत्प्रकारकत्वमेव। तद्विशेष्य
कत्वविशिष्टं तत्तद्विशेष्यकत्वावच्छिन्नं तत्प्रकारकत्वं इत्यर्थः। संसर्गविधयेति। नवद्युक्तक्रमेण प्रामाण्यघटकीभू
तेत्यादिः। तथा च संसर्गविधया तज्ज्ञानस्य च प्रामाण्यज्ञानान्यत्वादित्यर्थः। न संसर्गविधया तद्विशेष्यताज्ञानस्य त
त्प्रकारकत्वज्ञानस्य च प्रामाण्यज्ञानत्वं वाच्यमतस्त्वाह। किं त्विति। एतदपि तद्विशेष्यकतत्प्रकारकज्ञानमिति। एत
दपि। तद्विशेष्यकत्वतत्प्रकारज्ञानमपीत्यर्थः। वह्निगुंजयोरिति। वह्नौ गुंजाभ्रमः। गुंजायां च वह्निभ्रमः। समूहा
लंबनाकार इत्यर्थः। अतिव्याप्तिमाह। अस्तीति। तद्वारणमाह। किं त्विति। तथा च वह्नित्ववद्विशेष्यकत्वावच्छेदेन
वह्नित्वप्रकारकत्वं प्रामाण्यं तच्च न भ्रमे। वह्नित्ववद्विशेष्यकत्वावच्छेदेन गुंजात्वप्रकारकत्वस्यैव सत्त्वान्नातिव्याप्ति

रितिभावः। एतत्प्रामाण्यं प्रथमानुव्यवसायेन विषयीकर्तुमशक्यमित्याह। न चेति। तद्ग्राहादीनां मतं दूषयि-
त्वा सिद्धान्तयति। नास्त्विति। प्रथमानुव्यवसायेनेति। तथा च प्रथमानुव्यवसायेन तद्विशेष्यकत्वतत्प्रकारक-
त्वयोर्द्वयोरग्रहणात्। द्वितीयेनेति। द्वितीयानुव्यवसायेनेत्यर्थः। द्वितीयानुव्यवसायेन तद्विशेष्यकत्वं प्राप्यमसंपर्का-
रतया भातुमर्हतीति। नवद्विच्छिन्नत्वे तु स्वरूपसंबंधस्वरूपतया भासकत्वग्रहमिति घटत्वावच्छिन्नविशेष्यकत्वावच्छि-
न्नघटत्वप्रकारकत्वं प्रामाण्यं सुग्रहमिति भावः। प्रामाण्यसंशयो न स्यादित्यस्य द्वितीयानुव्यवसायोत्तर-
मित्यादि। तत्र द्वितीयानुव्यवसायेनैव प्रामाण्यनिश्चयादिति भावः। दोषवशादिति। सदृष्टादेरेव तत्र दो-
षत्वमिति भावः। अन्यथा तद्योग्यस्य तेनावश्यं ग्रहे तस्य पुरुषत्वादेरित्यर्थः। चक्षुर्वेधत्वादिति। चक्षुर्यो-
ग्यत्वेन चक्षुःसंनिकर्षेण चक्षुषावश्यं ग्रहणादित्यर्थः। एवं प्रामाण्यस्य द्वितीयानुव्यवसायग्राह्यत्वे तज्ञस्य ५२
तत्वं। प्रथमानुव्यवसायेनाग्रहणादित्यनेनान्तरं तेनेति शेषः। एवं द्वितीयानुव्यवसायेनाग्रहेण तज्ञाहकं। प्रामा-
ण्यग्राहकमित्यर्थः। संप्रतिपन्नवदिति। द्वितीयानुव्यवसायादिना ज्ञातप्रामाण्यकपुरुषज्ञानवदित्यर्थः।

ननु तेन तज्ज्ञानीयेन प्रामाण्ये न गृहीते तेन कथमन्वयिनानुमानेन प्रामाण्यं साध्यते सामान्यतो तद्वति तत्प्रकारकत्वा-
दिनाक्वचिन्नीतमस्तीत्यभिप्रायेण [illegible] । यत्रेति। यत्र प्रामाण्याभाव इत्यर्थः। तत्रैवं करादिपुरुषत्वज्ञानाभावः।
अत्र व्यतिरेकदृष्टान्तमाह। यथा घट इति। अप्रा [illegible] माण्ये च भावरूपप्रामाण्यं प्रथमं व्यतिरेकिना गृह्यते
पश्चात् तत्स्मरणे प्रथामात्वत्वाश्रयीकृतं प्रामाण्यं भावरू[illegible]पमपि तद्दृष्टान्तेन गृह्यते। इति रहस्यं। अतएव
वा[illegible]मप्रामाण्याभाव एवेत्यत्र समयपद्धतुपात्तमिति ध्येयं। साध्यप्रसिद्धिर्दोष इति शेषः। तदप्रसिद्ध्याप्रसि-
द्धेत्यर्थः। न साध्याभावस्याप्रतियोगिरूपत्वात्। अप्रामाण्यरूपत्वात्। कथं यद्विशिष्टाद्युमितिरिति। विशिष्टज्ञा-
नस्य विशेषणज्ञानहेतुत्वादिति भावः। अप्रामाण्याभावविशेष्यकाया एवेति। ज्ञाने अप्रामाण्याभाव इत्याकार-
कानुमितिरित्यर्थः। तथा च तत्प्रकारकबुद्धौ तज्ज्ञानेकारणं न तु तद्विशेष्यकबुद्धावपीति भावः। एतन्मतं दूषय-
ति। अस्त्विति। अन्यैवेति। द्वितीयानुव्यवसायेन भावरूपतद्वति तत्प्रकारकत्वप्रामाण्यग्रहात्साध्यप्रसिद्धाव-
न्वयिनारेकिणा च तद्ग्रहसेनवादित्यादिगविरित्यर्थः। प्रागुक्तमनेन प्रमाणान्तरमप्याह। किंचेति। नवकसा

व्याप्तसिद्धप्रमाणेनावरूपप्रमाण्येविशेष्यकानुमितिर्हेतुज्ञानं तु न स्यादतो न विषयतीत्यादौ क
दादिमता रादिमद्विशेष्यकत्वे इत्यर्थः। न हीति तथा च गुरुरूपत्ववनिष्ठरूपत्वप्रकारकत्व रूप्यप्रामाण्य
मेयानुव्यवसायेन गृह्यतां किमनुमानादिना तद्ग्रहणे गौरवेणेत्यर्थः। अनुमानद्वितीयानुव्यवसाय
ग्राह्यत्वात्प्रकारकज्ञानत्वमेवेति तथा च व्यधिकरणत्वकज्ञानाप्रकाज्ञानाप्रसिद्धेरर्थात्तत्प्रकारकं
याद्गृहीतं सर्वं तत्तद्विशेष्यकमेवेति भावः। न दसिद्धः। रजतत्वप्रकारकशुक्तिज्ञानासिद्धेः। इदमेव विष्ण
दर्शयति। नेति। शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानासिद्धावित्यर्थः। तद्विशेष्यकत्वव्यवहारे तज्ज्ञान
विना चांप्रवृत्तिस्तत्र तस्यादत आह। रजतत्वप्रकारिकेति। अप्रशंकतो अथेति। प्रवृत्तौ। अप्रमाप्रमासाधारण
प्रवृत्तिसामान्यमित्यर्थः। शुक्तौ प्रवृत्तिः रजतार्थितयेत्यादिः तत्रापि प्रमास्थलेपीत्यर्थः। तथा च प्रमास्थलेतत्प्र ५३
कारकज्ञानं न कारणं किंतु रजतेष्टतावच्छेदकासंसर्गाग्रह एवेति। न क्वापि व्यभिचार इति भावः। सवादिनी
अबाधितविषयाद्यविद्धिसंवादिनी। बाधितविषया इत्यर्थः। लाघवात्। इष्टतावच्छेदकासंसर्गाग्रहोपेक्ष